शमावै है। बहुरि ताके अनंतरि तीहिं संज्वलन क्रोधका नवक बंधसहित मध्यम जो अप्रत्याख्यान वा प्रत्याख्यान मान युग्म ताकौं उपशमावै है बहुरि ताके अनंतरि संज्वलन मानकौं उपशमावै है। बहुरि ताके अनंतरि तीहिं संज्वलन मानका नवक बंध सहित मध्यम जो अप्रत्याख्यान प्रत्याख्यान माया युग्म ताकौं उपशमावै है। बहुरि ताके अनंतरि संज्वलन मायाकौं उपशमावै है। बहुरि ताके अनंतरि तीहि संज्वलन मायाकौं नवक बंध सहित मध्यम जो अप्रत्याख्यान प्रत्याख्यान लोभ ताकौं उपशमावै है बहुरि ताके अनंतरि वादर संज्वलन लोभकौं उपशमावै है ऐसा विशेष मोहनीय कर्महीका जानना जातैं मोहनीय विना और कर्मनिका उपशम विधान नाहीं है ऐसैं उपशम श्रेणीविषैं मोहकौं उपशमावै है सत्ता नाश न हो है तातैं अपूर्वकरणादिक उपशांत कषाय गुणस्थानपर्यंत उपशम श्रेणीवालेकैं नरकायु तिर्यंचायु विना एकसौ छियालीस प्रकृतिकी सत्ता जाननी। बहुरि क्षायिक सम्यग्दृष्टि उपशम श्रेणीवालेकैं एकसौ अठतीसकी सत्ता अपूर्वकरणादि उपशांतकषायपर्यंत जाननी। तथा जाके आयु बंध न भया होइ तिस क्षायिक सम्यग्दृष्टीकैं असंयतादिक च्यारि गुणस्थाननिविषैं भी एकसौ अठतीस ही की सत्ता जाननी ॥ ३४३ ॥

णिरयादिसु पयडिट्ठिदिअणुभागपदेसभेदभिण्णस्स।
सत्तस्स य सामित्तं णेदव्वमिदो जहाजोग्गं ॥ ४४ ॥

निरयादिषु प्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नस्य।
सत्त्वस्य च स्वामित्वं नेतव्यमितो यथायोग्यं ॥ ३४४ ॥

जी० प्र०—इतः परं नरकगत्यादिमार्गणासु प्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नस्य चतुर्विधसत्त्वस्य स्वामित्वं यथायोग्यं नेतव्यं ॥ ३४४ ॥

अथ परिभाषामाह—

स० चं०—इहांतैं आगैं नरक गत्यादिक मार्गणानिविषैं प्रकृति स्थिति अनुभाग प्रदेश च्यारि प्रकार भेदकौं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लीए कर्मनिका जो सत्त्व सो यथायोग्य प्राप्तकरना ॥ ३४४ ॥ आगैं परिभाषा कहैं हैं—

तिरिए ण तित्थसत्तं णिरयादिसु तिय चउक्क चउ तिण्णि।
आऊणि होंति सत्ता सेसं ओघादु जाणेज्जो ॥ ३४५ ॥

तिरश्चि न तीर्थसत्वं निरयादिषु त्रीणि चतुष्कं चत्वारि त्रीणि ।
आयूंषि भवंति सत्ताः शेषमोघाज्ज्ञातव्यं ॥ ३४५ ॥

जी० प्र०—तिर्यग्जीवे तीर्थकृत्त्वसत्त्वं न स्यात् । नरकगतौ भुज्यमाननरकायुबध्यमानतिर्यग्मनुष्यायुषी चेति त्रयमेव, न देवायुः । तिर्यग्गतौ भुज्यमानतिर्यगायुः बध्यमानतिर्यग्मनुष्यदेवायूंषीति चत्वारि । मनुष्यगतौ भुज्यमानमनुष्यायुर्बध्यमाननरकतिर्यग्मनुष्यदेवायूंषीति चतुष्कं । देवगतौ भुज्यमानदेवायुर्बध्यमानतिर्यग्मनुष्यायुषी इति त्रयं । शेषप्रकृतिसत्त्वं सर्वं गुणस्थानवज्ज्ञातव्यं ॥ ३४५ ॥ अथ नरकगतौ सत्त्वमाह—

सं० च०—तिर्यंचविषैं तीर्थंकर प्रकृतिका सत्त्व नाही है बहुरि नरक गतिविषैं भुज्यमान नरकायु बध्यमान तिर्यंचायु वा मनुष्यायु ऐसैं तीन आयुही का सत्त्व है देवायुका नाही । बहुरि तिर्यंचगतिविषैं भुज्यमान तिर्यंचायु बध्यमान नरकायु तिर्यंचायु मनुष्यायु देवायु ऐसैं च्यार्‍यो आयुका सत्त्व है । बहुरि मनुष्यगतिविषैं भुज्यमान मनुष्यायु बध्यमान नरकायु तिर्यंचायु मनुष्यायु देवायु ऐसैं च्यार्‍यो आयुका सत्त्व है। बहुरि देवगतिविषैं भुज्यमान देवायु बध्यमान तिर्यंचायु मनुष्यायु ऐसैं तीन आयुका सत्व है। जाकौं भोगवै है ताकौं भुज्यमान कहिये आगामी उदय होनेकौं योग्य जाका बध भया होइ सो बध्यमान कहिए बहुरि अवशेष प्रकृतिनिका सत्व गुणस्थानवत् जानना ॥ ३४५ ॥ तहां नरकगतिविषैं सत्व कहै हैं—

ओघं वा णेरइये ण सुराऊ तित्थमत्थि तदियोत्ति।
छट्ठित्ति मणुस्साऊ तिरिए ओघं ण तित्थयरं ॥ ३४६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ओघ इव नैरयिके न सुरायुस्तीर्थमस्ति तृतीय इति।
षष्ठ इति मनुष्यायुस्तिरश्चि ओघो न तीर्थकरं ॥ ३४६ ॥

जी० प्र०—नारके गुणस्थानवन्न देवायुरिति सप्तचत्वारिंशच्छतं। तत्रापि तृतीयपृथ्वीपर्यंतं तीर्थसत्त्वमस्ति न चतुर्थ्यादिष्विति षट्चत्वारिंश-
च्छतं। तत्रापि षष्ठपृथ्वीपर्यंतं मनुष्यायुःसत्वमस्ति न माघव्यामिति पंचचत्वारिंशच्छतं। तत्र धर्मादित्रयसत्त्वे १४७। मिथ्यादृष्टावसत्त्वं शून्यं। सत्त्वं
सर्वं। सासादने तीर्थाहाराः असत्त्वं। सत्त्वं चतुश्चत्वारिंशच्छतं। मिश्रे तीर्थमसत्वं सत्वं षट्चत्वारिंशच्छतं। असंयते असत्वं शून्यं, सत्वं सर्वं १४७।
अंजनादित्रयसत्वे १४६ मिथ्यादृष्टावसत्वं शून्यं सत्वं सर्वं १४६। सासादने आहारकद्विकमसत्वं सत्वं च चतुश्चत्वारिंशच्छतं। मिश्रे अ-
सत्वं शून्यं। सत्वमाहारकद्वयसद्भावात् सर्वं १४६। असंयते असत्वं शून्यं सत्वं सर्वं १४६।
माघवीसत्वे १४५ मिथ्यादृष्टावसत्वं शून्यं, सत्वं सर्वं १४५। सासादने आहारकद्वयमसत्वं सत्वं त्रिचत्वारिंशच्छतं। मिश्रेऽसत्वं शून्यं, सत्वं
सर्वं १४५। असंयतेऽसत्वं शून्यं सत्वं सर्वं १४५।
तिर्यग्गतौ ओघो, न तीर्थकरमिति सत्त्वं सप्तचत्वारिंशच्छतं। तत्र मिथ्यादृष्टौ असत्वं शून्यं सत्वं सर्वं १४७। सासादने आहारकद्विकमसत्वं
सत्वं पंचचत्वारिंशच्छतं। मिश्रे असत्वं शून्यं सत्वं सर्वं १४७। असंयते नारकमनुष्यायुषी व्युच्छित्तिः, तत्सत्वेऽणुव्रताघटनात्। असत्वं शून्यं
सत्वं सप्तचत्वारिंशच्छतं। देशसंयते तद्द्वयमसत्वं सत्वं पंचचत्वारिंशच्छतं ॥ ३४६ ॥

सं० च०—नरकगतिविषैं गुणस्थानवत् है तहां देवायुका सत्व नाहीं तातैं सत्व योग्य एकसौ सैंतालीस है तहां भी तीर्थंकरका सत्व तीसरी पृथ्वी ताईं है तातैं चौथी आदि पृथ्वीनिविषैं सत्व एकसौ छियालीस है तहां भी मनुष्यायुका सत्व छठीपृथ्वी ताईं है तातैं सातवीं माघवी पृथ्वीविषैं एकसौ पैंतालीस ही सत्व है। तहां धर्मादिक तीन पृथ्वीनिविषैं सत्व एकसौ सैंतालीस सो मिथ्यादृष्टिविषैं असत्व नास्ति सत्व एकसौ सैंतालीस, सासादनविषैं आहारक द्विक तीर्थंकर ए असत्व तीन सत्व एकसौ चवालीस मिश्रविषैं असत्व एक तीर्थंकर सत्व एकसौ छियालीस असंयतविषैं असत्व शून्य ० सत्व एकसौ सैंतालीस। बहुरि अंजनादिक तीन पृथ्वीनिविषैं सत्व एकसौ छियालीस तहां मिथ्यादृष्टिविषैं असत्व नास्ति सत्व एकसौ छियालीस सासादनविषैं असत्व आहारकद्विक सत्व एकसौ चवालीस मिश्र अविरतविषैं असत्व नास्ति सत्व एकसौ छियालीस बहुरि माघवी सातवीं पृथ्वीविषैं सत्व एकसौ पैंतालीस तहां मिथ्यादृष्टि मिश्र अविरतविषैं असत्व नास्ति सत्व एकसौ पैंतालीस सासादनविषैं असत्व आहारकद्विक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्व एकसौ तियालीस जानना। बहुरि तिर्यंचगतिविषैं तीर्थंकर विना गुणस्थानवत् सत्व एकसौ सैंतालीस तहां मिथ्यादृष्टि मिश्र अविरतविषैं असत्व शून्य ० सत्व एकसौ सैंतालीस सासादनविषैं असत्व आहारद्विक सत्व एकसो पैंतालीस बहुरि असंयतविषैं नरकायु मनुष्यायुकी व्युच्छित्ति भई जातैं इनका सत्व होतैं अणुव्रत न होइ तातैं देशव्रतविषैं असत्व नरकायु मनुष्यायु दोय, सत्व एकसौ पैंतालीस है ॥ ३४६ ॥

एवं पंचतिरिक्खे पुण्णिदरे णत्थि णिरयदेवाऊ।
ओघं मणुसतियेसुवि अपुण्णगे पुण अपुण्णेव ॥ ३४७ ॥

एवं पंचतिराश्चि पूर्णेतरस्मिन् नास्ति निरयदेवायुः।
ओघो मनुष्यत्रयेष्वपि अपूर्णके पुनरपूर्णे इव ॥ ३४७॥

जी० प्र०—एवं तिर्यक्त्सामान्यपंचेंद्रियपर्याप्तयोनिमदपर्याप्तपंचविधतिर्यक्ष्वपि भवति। तत्र लब्ध्यपर्याप्ते तु नारकदेवायुषी अपि नेति सत्वं पंचचत्वारिंशच्छतं। गुणस्थानं मिथ्यादृष्टिरेव। कुतः ? 'णहि सासणो अपुण्णे' इति नियमात्। मनुष्यगतौ सामान्यपर्याप्तकयोनिमत्त्रिविधमनुष्येष्वोघः किंतु योनिमत्क्षपके एवैव विशेषः, तेन शेषद्वये सत्वमष्टचत्वारिंशच्छतं। तत्र मिथ्यादृष्टौ नानाजीवापेक्षया सत्वं सर्वं। सासादने तीर्थाहारा नेति पंचचत्वारिंशच्छतं। मिश्रे तीर्थं नेति सप्तचत्वारिंशच्छतं। असंयते सर्वं। देशसंयते प्रमत्ताप्रमत्तयोश्च न नरकतिर्यगायुषी बध्यमानदेवायुर्भुज्यमानमनुष्यायुश्चेति षट्चत्वारिंशच्छतं। क्षपकापूर्वकरणे भुज्यमानमनुष्यायुरस्तीति शेषायुस्त्रयसप्तप्रकृत्यभावादष्टत्रिंशच्छतं। उपशमश्रेण्यपेक्षया नरकतिर्यगायुरभावात् षट्चत्वारिंशच्छतं। क्षायिकसम्यक्त्वं प्रत्यष्टत्रिंशच्छतं। अबद्धायुर्मनुष्यासंयतादिचतुर्ष्वपि तत्प्रत्यष्टत्रिंशच्छतं। अनिवृत्तिकरणे उपशमश्रेण्यपेक्षया षट्चत्वारिंशच्छतं अष्टत्रिंशच्छतं च। क्षपकश्रेण्यपेक्षया प्रथमभागे अष्टत्रिंशच्छतं द्वितीयभागे द्वाविंशतिशतं षोडशानां तत्प्रथमभागचरमसमये एव क्षपणात्। तृतीयभागे मध्यमाष्टकषायाभावाच्चतुर्दशशतं। चतुर्थभागे षंढवेदाभावात्त्रयोदशशतं। पंचमभागे स्त्रीवेदाभावाद् द्वादशशतं। षष्ठभागे षण्णोकषायाभावात् षडुत्तरशतं। सप्तमभागे पुंवेदाभावात्पंचोत्तरशतं। अष्टमभागे संज्वलनक्रोधाभावाच्चतुरुत्तरशतं। नवमभागे संज्वलनमानाभावात्त्र्युत्तरशतं। सूक्ष्मसांपराये संज्वलनमायाऽभावात् द्व्युत्तरशतं। उपशमश्रेण्यपेक्षया षट्चत्वारिंशच्छतं अष्टचत्वारिंशच्छतं च। उपशांतकषाये द्वाचत्वारिंशच्छतं, अष्टत्रिंशच्छतं च। क्षीणकषाये संज्वलनलोभाभावादेकोत्तरशतं। सयोगे निद्राप्रचलादिषोडशाभावात् पंचाशीतिः। अयोगे द्विचरमसमयांते च निद्राप्रचलादिषोडशाभावात्पंचाशीतिः। चरमसमये द्वासप्तत्यभावात्त्रयोदश।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योनिमन्मनुष्ये तु क्षपकश्रेण्यां न तीर्थं, तीर्थसत्त्वस्यातोऽप्रमत्तादुपरि स्त्रीवेदित्वासंभवात् । अपूर्वकरणे सत्त्वं सप्तत्रिंशच्छतं । असत्त्वं दश । अनिवृत्तिकरणे प्रथमभागे सत्त्वं सप्तत्रिंशच्छतं । असत्त्वं दश । द्वितीयभागे षोडश संयोज्यासत्त्वं षड्विंशतिः । सत्त्वमेकविंशतिशतं । तृतीयभागे अष्ट संयोज्याऽसत्त्वं चतुस्त्रिंशत् सत्त्वं त्रयोदशशतं । चतुर्थभागे एकं संयोज्यासत्वं पंचत्रिंशत् सत्वं द्वादशशतं । पंचमभागे एकं संयोज्यासत्वं षट्त्रिंशत् सत्त्वमेकादशशतं । षष्ठभागे षट् संयोज्यासत्त्वं द्वाचत्वारिंशत् सत्वं पंचोत्तरशतं । सप्तमभागे एकं संयोज्यासत्वं त्रिचत्वारिंशत्, सत्वं चतुरुत्तरशतं । अष्टमभागे एकं संयोज्यासत्वं चतुश्चत्वारिंशत्, सत्वं त्र्युत्तरशतं । नवमभागे एकं संयोज्यासत्वं पंचचत्वारिंशत्, सत्वं द्व्युत्तरशतं । सूक्ष्मसांपराये लोभव्युच्छित्तिः, असत्वं संज्वलनमायां संयोज्य षट्चत्वारिंशत्, सत्वमेकोत्तरशतं । क्षीणकषाये लोभं संयोज्यासत्वं सप्तचत्वारिंशत्, सत्वं शतं । सयोगे षोडश संयोज्यासत्वं त्रिषष्टिः, सत्वं चतुरशीतिः । अयोगे द्विचरमसमये असत्वं त्रिषष्टिः, सत्वं चतुरशीतिः । चरमसमयेऽसत्वं द्वासप्ततिं संयोज्य पंचत्रिंशदुत्तरशतं, सत्वं द्वादश ।

लब्ध्यपर्याप्तकमनुष्ये पुनस्तिर्यग्लब्ध्यपर्याप्तकवत्तीर्थनरकदेवायूंषि नेति सत्वं पंचचत्वारिंशच्छतं, गुणस्थानं मिथ्यादृष्टिरेव ॥३४७॥ अथ देवगतावाह—

स० चं०—ऐसैंही सामान्य तिर्यंच पंचेंद्री तिर्यंच योनिमत् तिर्यंच पर्याप्त तिर्यंच अपर्याप्त तिर्यंचविषैं जानना विशेष इतना जो लब्धि अपर्याप्तकविषैं नरकायु देवायुका सत्व नाहीं तातैं सत्व एकसौ पैंतालीस, गुणस्थान एक मिथ्यादृष्टि ही है जातैं 'णहि सासणो अपुण्णे' इस वचनतैं ताकैं सासादन भी न होइ। बहुरि मनुष्य गतिविषैं सामान्य मनुष्य पर्याप्त मनुष्य योनिमत् मनुष्यविषैं ओघः गुणस्थानवत् है। तहां योनिमत् मनुष्यविषैं क्षपक श्रेणीविषैं विशेष है जातैं सामान्य मनुष्य अर पर्याप्त मनुष्यविषैं मिथ्यादृष्ट्यादि अयोगी गुणस्थानपर्यंत सर्व सत्व असत्व गुणस्थान रचनावत् जानना विशेष इतना जो देश संयत गुणस्थानविषैं तिर्यंचायुकी भी सत्ता नाहीं तातैं तहां सत्व एकसौ छियालीस असत्व दोय कहना अन्य सर्व कथन समान जानना। बहुरि योनिमत् मनुष्यविषैं क्षपकश्रेणीविषैं तीर्थंकर सत्तावालेकैं अप्रमत्त गुणस्थानतैं ऊपरी स्त्रीवेदीपणाका अभाव है तातैं अपूर्वकरणविषैं सत्व एकसौ सैंतीस असत्व दश ऐसैं ही अनिवृत्ति करणका नवभाग वा सूक्ष्मसांपरायादिक अयोगी पर्यंतविषैं गुणस्थानोक्त सत्वतैं एक एक घाटि सत्व जानना, असत्व गुणस्थानोक्त ही जानना बहुरि लब्धि अपर्याप्तक मनुष्यविषैं लब्धि अपर्याप्तक तिर्यंचवत् तीर्थंकर नरकायु देवायु विना सत्व एकसौ पैंतालीस गुणस्थान एक मिथ्यादृष्टि जानना ॥ ३४७ ॥ आगैं देवगतिविषैं कहैं हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ओघं देवे ण हि णिरयाउ, सारोत्ति होदि तिरियाउ, ।
भवणतियकप्पवासियइत्थीसु ण तित्थयरसत्तं ॥३४८॥

ओघो देवे नहि निरयायुः सार इति भवति तिर्यगायुः ।
भवनत्रयकल्पवासिकस्त्रीषु न तीर्थकरसत्त्वं ॥ ३४८ ॥

जी प्र०—देवगतौ ओघः किंतु नरकायुर्नहि पुनः सहस्रारपर्यंतमेव तिर्यगायुरस्ति न तत उपरि, तेन सौधर्मादिसहस्रारपर्यंतं द्वादशकल्पेषु सत्वं सप्तचत्वारिंशच्छतं । तत्र मिथ्यादृष्टौ तीर्थं न 'किण्हदुगसुहतिलेस्सय वामेविणितित्थयरसत्त'मिति नियमात् सत्वं षट्चत्वारिंशच्छतं, असत्वमेकं । सासादने तीर्थाहारा असत्वं । सत्वं चतुश्चत्वारिंशच्छतं । मिश्रे तीर्थमसत्वं सत्वं षट्चत्वारिंशच्छतं । असंयते सत्वं सप्तचत्वारिंशच्छतं, असत्वं शून्यं ।

आनतादिचतुःकल्पेषु नवग्रैवेयकेषु च नरकतिर्यगायुषी नेति सत्वं षट्चत्वारिंशच्छतं । तत्र मिथ्यादृष्टावसत्वं तीर्थं, सत्वं पंचचत्वारिंशच्छतं । सासादने असत्वं तीर्थाहाराः सत्वं त्रिचत्वारिंशच्छतं । मिश्रे तीर्थमसत्वं सत्वं पंचचत्वारिंशच्छतं । असंयते असत्वं शून्यं, सत्वं षट्चत्वारिंशच्छतं ।

नवानुदिशपंचानुत्तरविमानसम्यग्दृष्टिषु नरकतिर्यगायुषी नेति सत्वं षट्चत्वारिंशच्छतं । भवनत्रयदेवेषु कल्पस्त्रीषु च तीर्थनरकायुषी नेति सत्वं षट्चत्वारिंशच्छतं । तत्र मिथ्यादृष्टौ सत्वं तदेव, असत्वं शून्यं । सासादने आहारकद्विकमसत्वं, सत्वं चतुश्चत्वारिंशच्छतं । मिश्रासंयतयोरसत्वं शून्यं, सत्वं षट्चत्वारिंशच्छतं ॥ ३४८ ॥ अथेंद्रियमार्गणायामाह—

स० चं०—देवगतिविषैं नरकायुविना सामान्यवत् सत्व प्रकृति एकसौ सैंतालीस हैं । बहुरि तिर्यंचायुका सत्व सहस्रार पर्यंत ही है ऊपरि नाहीं है सो सौधर्मादिक सहस्रारपर्यंत बारहस्वर्गनिविषैं सत्व एकसौ सैंतालीस तहां 'किण्ह दुगसुहतिलेस्सय वामेविणितित्थयरसत्तं' इस वचनकरि तीर्थंकरका सत्व विना मिथ्यादृष्टिविषैं सत्व एकसौ छियालीस असत्व एक । सासादनविषैं तीर्थंकर आहारक द्विक ए असत्व तीन, सत्व एकसौ चवालीस मिश्रविषैं असत्व एक तीर्थंकर सत्व एकसौ छियालीस, असंयतविषैं असत्व नास्ति सत्व एकसौ सैतालीस है, बहुरि आनतादि च्यारि स्वर्ग अर नवग्रैवेयक इनविषैं नरकायु तिर्यंचायु विना सत्व एकसौ छियालीस तहां मिथ्यादृष्टि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिश्रविषैं असत्व एक तीर्थंकर सत्व एकसौ पैंतालीस सासादनविषैं तीर्थंकर आहारद्विक ए असत्व तीन सत्व एकसौ तियालीस, असंयतविषैं असत्व नास्ति सत्व एकसौ छियालीस बहुरि नवानुदिश पंचानुत्तरविमानविषैं नरकायु तिर्यंचायु विना सत्व प्रकृति एकसौ छियालीस गुणस्थान एक असंयत ही है बहुरि भवनत्रिक देव कल्पवासिनी स्त्री इनविषैं तीर्थंकर नरकायु विना सत्व एकसौ छियालीस तहां मिथ्यादृष्टिविषैं सत्व एकसौ छियालीस असत्व शून्य ० सासादनविषैं असत्व आहारकद्विक सत्व एकसौ चवालीस मिश्र असंयतविषैं असत्व शून्य सत्व एकसौ छियालीस जानना ॥ ३४८ ॥ आगैं इंद्रिय कायमार्गणाविषैं कहै हैं—

ओघं पंचक्खतसे सेसिंदियकायगे अपुण्णं वा ।
तेउदुगे ण णराउ, सव्वत्थुव्वेल्लणावि हवे ॥ ३४९ ॥

ओघः पंचाक्षत्रसे शेषेंद्रियकायके अपूर्णं वा ।
तेजोद्विके न नरायुः सर्वत्रोद्वेल्लनापि भवेत् ॥ ३४९ ॥

जी प्र०—इंद्रियकायमार्गणायोः पंचाक्षे त्रसे च ओघः इति सत्वमष्टचत्वारिंशच्छतं । गुणस्थानानि चतुर्दश । तद्रचना सामान्योक्तैव ज्ञातव्या ।

संदृष्टिः—

पंचेंद्रियत्रसकायिकयोर्योग्याः सत्त्वप्रकृतयः १४८ ।

गु	मि०	सा०	मि०	अ०	दे१	प्र०	अ८	अ०	अ१६	अ८	१	१	६	१	१	१	१	सू१	उ	०	क्षी१६	स०	अ७:	१३
स	१४८	१४५	१४७	१४८	१४७	१४६	१४६	१३८	१३८	१२२	११४	११३	११२	१०६	१०५	१०४	१०३	१०२	१४६	१३८	१०१	८५	८५	१३
अ	०	३	१	०	१	२	२	१०	१०	२६	३४	३५	३	४२	४३	४४	४५	४६	२	१०	४७	६३	६३	१३५

शेषैकद्वित्रिचतुरिंद्रियपृथ्व्यब्वनस्पतिकायिकेषु लब्ध्यपर्याप्तत्वचीर्थनरकदेवायुरभावात् सत्वं पंचचत्वारिंशच्छतं । तत्र मिथ्यादृष्टौ सत्वं पंचचत्वारिंशच्छतं, असत्वं शून्यं । सासादने आहारकद्वयमसत्वं, सत्वं त्रिचत्वारिंशच्छतं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेजोद्विके मनुष्यायुरपि नेति सत्वं चतुश्चत्वारिंशच्छतं। तत्र मिथ्यादृष्टिगुणस्थानमेकमेव। 'णहि सासणो अपुण्णे साहारणसुहुमगे य तेउदुगे' इति नियमात्। सर्वत्र इंद्रियमार्गणायां कायमार्गणायां चोद्वेल्लनापि भवेत् वल्वजरज्जुभावविनाशवत् प्रकृतेरुद्वेल्लनभागहारेणापकृष्य परप्रकृतितां नीत्वा विनाशनमुद्वेल्लनं ॥ ३४९ ॥ ताः प्रकृतीराह—

स० चं०—इंद्रियमार्गणा अर कायमार्गणानिविषैं पंचेंद्री अर त्रसकाय इनविषैं सामान्यवत् सत्व प्रकृति एकसौ अठतालीस गुणस्थान सव चौदह तिनविषैं सर्व रचना गुणस्थानवत् जाननी किछू विशेष नाही बहुरि अवशेष एकेंद्री वेंद्री तेंद्री चौंद्री मार्गणा अर पृथ्वी अप वनस्पती काय मार्गणा इनविषैं लब्धि अपर्याप्तवत् तीर्थंकर नरकायु देवायु विना सत्व प्रकृति एकसौ पैंतालीस तहां मिथ्यादृष्टिविषैं सत्व एकसौ पैंतालीस असत्व शून्य० सासादनविषैं असत्व आहारकद्विक सत्व एकसौ तियालीस बहुरि तेजकाय वातकायविषैं मनुष्यायु भी नाहीं तातैं सत्त्व प्रकृति एकसौ चवालीस गुणस्थान एक मिथ्यादृष्टि है। बहुरि सर्व इंद्रियमार्गणा अर कायमार्गणाविषैं उद्वेलना भी हो है। उद्वेलना कहा कहिए? जैसें जेवरा बल देइ करि वट्या था पीछेंहू बलकरि उघेडिए तैसें जिन प्रकृतिनिका बंध कीया था पीछें तिनकौं उद्वेलन भागहारतैं अपकर्षण करि अन्य प्रकृतिपनेकौं प्राप्तकरि नाश करना उद्वेलन कहिए। ३४९। ते उद्वेलन प्रकृति कौन हैं? सो कहैं हैं—

हारदु सम्मं मिस्सं सुरदुग णारयचउक्कमणुकमसो।
उच्चागोदं मणुदुगमुव्वेल्लिज्जंति जीवेहिं ॥ ३५० ॥

हारद्वि सम्यक् मिश्रं सुरद्विकं नारकचतुष्कमनुक्रमशः।
उच्चैर्गोत्रं मनुद्विकमुद्वेल्ल्यंते जीवैः ॥ ३५० ॥

जी० प्र०—उद्वेल्लनविधानं विस्तरेण वक्ष्यमाणमप्यत्र प्रसंगायातं। आहारद्विकं सम्यक्त्वप्रकृतिः मिश्रप्रकृतिः सुरद्विकं नारकचतुष्कं उच्चैर्गोत्रं मनुष्यद्विकं चेति त्रयोदश प्रकृतयः क्रमेणोद्वेल्ल्यंते ॥ ३५० ॥ कैर्जीवैः का इति चेदाह—

स० चं०—उद्वेलनाका विधान आगै विस्तारतैं कहिएगा तथापि इहां भी प्रसंग पाइ किछू कहिए है—आहा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रकद्विक २ सम्यक्त्व मोहनी १ मिश्रमोहनी १ देवगति वा आनुपूर्वी २ नरकगति वा आनुपूर्वी वैक्रियिक शरीर वा अंगोपांग ए वैक्रियिक चतुष्क वा नारक चतुष्ककी च्यारि ४ उच्चगोत्र १ मनुष्यगति वा आनुपूर्वी २ तेरह प्रकृति अनुक्रमतैं उद्वेलना रूप कीजिए है ॥ ३५० ॥ कौंन जीव किस प्रकृतिकी उद्वेलना करै सो कहिए है—

चदुगदिमिच्छे चउरो इगिविगले छप्पि तिण्णि तेउदुगे ।
सिय अत्थि णत्थि सत्तं सपदे उप्पण्णठाणेवि ॥ ३५१ ॥

चतुर्गतिमिथ्ये चतस्रः एकविकले षडपि तिस्रस्तेजोद्विके ।
स्यादस्ति नास्ति सत्वं स्वपदे उत्पन्नस्थानेऽपि ॥ ३५१ ॥

जी० प्र०—चतुर्गतिमिथ्यादृष्टौ चतस्रः । एकत्रिकलेंद्रियेषु षट् । तेजोद्विके तिस्रः । स्वस्थाने उत्पन्नस्थाने च सत्वं स्यादस्ति स्यान्नास्ति । तद्यथा—

तीर्थकरनरकदेवायुरसत्वचातुर्गतिकसंक्लिष्टमिथ्यादृष्टेराहारकद्विके उद्वेल्लिते त्रिचत्वारिंशच्छतं । सत्वं पुनः सम्यक्त्वप्रकृतावुद्वेल्लितायां द्वाचत्वारिंशच्छतं । पुनः सम्यग्मिथ्यात्वप्रकृतावुद्वेल्लितायां एकचत्वारिंशच्छतं, स्वस्थाने स्यात् । अकृतोद्वेल्लनस्य तस्य पंचचत्वारिंशच्छतमेव । उत्पन्नस्थाने एकद्वित्रिचतुरिंद्रियपृथ्वीवनस्पतिकायिकेषु तानि चत्वारि सत्वानि । पुनः सुरद्विके उद्वेल्लिते स्वस्थाने एकोनचत्वारिंशच्छतं । पुनर्नारकचतुष्के उद्वेल्लिते स्वस्थाने पंचत्रिंशच्छतं । उत्पन्नस्थाने तेजोद्विकमनुष्यायुरभावाच्चतुश्चत्वारिंशच्छतं द्वाचत्वारिंशच्छतं एकचत्वारिंशच्छतं चत्वारिंशच्छतं अष्टात्रिंशच्छतं चतुस्त्रिंशच्छतं च । पुनः स्वस्थाने उच्चैर्गोत्रे उद्वेल्लिते त्रयस्त्रिंशच्छतं । स्वस्थाने पुनः नरकद्विके उद्वेल्लिते एकत्रिंशच्छतं । स्वस्थाने इदमंत्यसत्वद्वयं । उत्पन्नस्थानेऽप्येकेंद्रियादिसप्तस्वप्यस्ति ॥ ३५१ ॥ अथ योगमार्गणायामाह—

स० चं०—च्यारयो गति वाले मिथ्यादृष्टि जीवनि विषैं च्यारि अर एकेंद्री विकलेंद्री विषैं छह अर तेज वात

(१)

	ए	द्वि	त्रि	च	पृ	अ	व	योग्य	१४५
	० आ २	० स १	० मि १	० सु २	० नार ४	उत्पन्न			
१४५	१४३	१४२	१४१	१३९	१३५	१३३	१३१		

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

काय विषैं तीन प्रकृति स्वस्थान अर उत्पन्न स्थानविषैं स्यादस्ति, स्यान्नास्ति कहिए कोई प्रकार सत्त्व है कोई प्रकार सत्व नाहीं है। जो उद्वेलना न भई होइ तो सत्व पाइए अर जो उद्वेलना भई होय तो सत्व न पाइए सो कहिए है–

तीर्थंकर नरकायु देवायु इनकी सत्ता जाकैं न पाइए ऐसा चतुर्गतिवाले संक्लेशपारिणामी मिथ्यादृष्टि जीव ताकैं उद्वेलना भए विना सत्व तो एकसौ पैंतालीस पाइए बहुरि आहारक द्विककी उद्वेलना भएं एकसौ तियालीसका सत्त्व पाइये बहुरि सम्यक्त्वमोहनीकी उद्वेलना भए सत्त्व एकसौ बियालीस पाइए बहुरि मिश्र मोहनीकी उद्वेलना भएं एकसौ इकतालीसका सत्व पाइए ऐसें स्वस्थानविषैं सत्व जानना। बहुरि उत्पन्न स्थान विषैं एकेंद्री वेंद्री तेंद्री चौंद्री पृथ्वी अप वनस्पतीकायविषैं ते च्यारि पूर्वोक्त प्रकार करि एकसौ पैंतालीस एकसौ तियालीस एकसौ बियालीस एकसौ इकतालीसका सत्व पाइए है। बहुरि देवगति वा आनुपूर्वी इन दोऊनिकी उद्वेलना भएं स्वस्थानविषैं तिन एकेंद्रियादिकनिकैं एकसौ गुणतालीसका सत्व है । बहुरि वैक्रियिक चतुष्ककी उद्वेलना भएं एकसौ पैंतीसका सत्व है । बहुरि उत्पन्नस्थान विषैं तेजःकाय वात कायविषैं मनुष्यायुका भी सत्व नाहीं तातैं विना उद्वेलना भएं सत्व एकसौ चवालीस बहुरि आहारक द्विककी उद्वेलना भएं क्रमसैं एकसौ बियालीस एकसौ इकतालीस एकसौ चालीस, सुरद्विककी उद्वेलनातैं एकसौ अठतीस वैक्रियिक चतुष्ककी उद्वेलनातैं एकसौ चौंतीस सत्त्व पाइए बहुरि स्वस्थानविषैं तेज वातकायिककैं उच्चगोत्रकी उद्वेलना भएं सत्व एकसौ तेतीसका है बहुरि मनुष्य द्विककी उद्वेलना भएं एकसौ इकतीस हीं का सत्व पाइए है। ए अंतके दोय सत्व एकसौ तेतीस वा एकसौ इकतीसका उत्पन्नस्थान विषैं एकेंद्री वेंद्री तेंद्री चौंद्री पृथ्वी अप

तेजोद्विकयोग्य १४५ ।

	० आ २	० सं १	० मि १	० सु २	० ना ४	० उ १	० म २
१४४	१४२	१४१	१४०	१३८	१३४	१३३	१३१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

वनस्पति विषैं भी जानना । यहां पूर्व पर्याय विषैं जो विना उद्वेलनातैं सत्व भया तिस सहित उत्तर पर्याय विषैं उपजै तहां उत्तर पर्याय विषै तिस सत्वकौं उत्पन्न स्थानविषैं सत्व कहिए बहुरि तिस विवक्षित पर्यायविषै विना उद्वेलना वा उद्वेलनातैं जो सत्त्व होय ताकौं स्वस्थानविषैं सत्व कहिये ॥ ३५१ ॥ आगैं योगमार्गणाविषैं कहै हैं—

पुण्णेकारसजोगे साहारयमिस्सगेवि सगुणोघं ।
वेगुव्वियमिस्सेवि य णवरि ण माणुसतिरिक्खाऊ ॥३५२॥

पूर्णैकादशयोगे साहारकमिश्रकेऽपि स्वगुणौघः ।
वैगूर्विकमिश्रेऽपि च नवरि न मानुषतिर्यगायुः ॥ ३५२ ॥

जी० प्र०—पूर्णैकादशयोगेषु चतुर्मनश्चतुर्वागौदारिकवैक्रियिकाहारकयोगेषु आहारकमिश्रे च स्वगुणौघः इत्यावेषु नवसु सत्त्वमष्टचत्वारिंशच्छतं । गुणस्थानानि त्रयोदश । तस्य संदृष्टिः—

मनो ४ । वाग्योग ४ । औदारिक काययोग १ । योग्य १४८ ।

व्यु	मि	सा	मि	अ १	दे १	प्र०	अ८	अ०	अ१६	८	१	१	६	१	१	१	१	सू१	उ	०	ती१६	स
स	१४८	१४५	१४७	१४८	१४७	१४६	१४६	१३८	१३८	१२२	११४	११३	११२	१०६	१०५	१०४	१०३	१०२	१४६	१३८	१०१	८५
अ	०	३	१	०	१	२	२	१०	१०	२६	३४	३५	३६	४२	४३	४४	४५	४६	२	१०	४७	६३

आहारकतन्मिश्रयोर्नरकतिर्यगायुरभावात् प्रमत्ते षट्चत्वारिंशच्छतं । वैक्रियिकयोगेऽष्टचत्वारिंशच्छतं । तत्र मिथ्यादृष्टौ सत्त्वं सर्वं तीर्थकरसत्वयुक्तस्य तृतीयपृथ्व्यंतं गमनात् । सासादने पंचचत्वारिंशच्छतं सत्त्वं, असत्त्वं त्रयं । मिश्रे सत्त्वं सप्तचत्वारिंशच्छतं, असत्त्वमेकं । असंयते सत्त्वं सर्वं ।

तन्मिश्रयोगे तिर्यग्मनुष्यायुषी नेति मिथ्यादृष्टौ सत्त्वं षट्चत्वारिंशच्छतं । असत्त्वं शून्यं । सासादने नरकायुस्तत्त्रयं च नेत्यसत्त्वं चत्वारि सत्त्वं द्वाचत्वारिंशत् शतं । असंयते सत्त्वं षट्चत्वारिंशत् शतं ॥ ३५२ ॥ औदारिकमिश्रयोगस्याह—

स० चं०—च्यारि मन योग च्यारि वचनयोग औदारिक वैक्रियिक आहारक योग आहारक मिश्रयोग इन विषैं अपना अपना गुणस्थानवत् रचना है तहां च्यारि मनयोग च्यारि वचनयोग औदारिक शरीर इनविषैं सत्व प्रकृति

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकसौ अठतालीस गुणस्थान बारह वा तेरह तहां रचना गुणस्थानवत् जाननी विशेष नाहीं। बहुरि आहारक आहारकमिश्र योगविषैं नरकायु तिर्यंचायु विना सत्व एकसौ छियालीस गुणस्थान एक प्रमत्त बहुरि वैक्रियिक योगविषै सत्व प्रकृति एकसौ अठतालीस गुणस्थान च्यारि। तहां मिथ्यादृष्टिविषैं सत्व सर्व असत्व नास्ति जातैं तीर्थंकर सत्तावाला तृतीय पृथ्वी पर्यंत जाय है। सासादन मिश्र अविरतविषैं गुणस्थानवत् असत्व सत्व जानना। बहुरि वैक्रियिक मिश्रविषैं तिर्यंचायु मनुष्यायु विना सत्व प्रकृति एकसौ छियालीस तहां मिथ्यादृष्टि अर असंयतविषैं असत्व नास्ति सत्व सर्व सासादनविषैं आहारक द्विक तीर्थंकर नरकायु ए असत्व च्यारि सत्व एकसौ बियालीस है ॥ ३५२ ॥ औदारिकमिश्रयोगविषैं कहैं हैं—

ओरालमिस्सजोगे ओघं सुरणिरयआउगं णत्थि ।
तम्मिस्सवामगे ण हि तित्थं कम्मेवि सगुणोघं ॥३५३॥

औरालमिश्रयोगे ओघः सुरनिरयायुष्कं नास्ति।
तन्मिश्रवामके न हि तीर्थं कार्मेऽपि स्वगुणौघः ॥ ३५३ ॥

जी० प्र०—औदारिकमिश्रयोगे सामान्यसत्त्वं किंतु सुरनारकायुषी न स्तः इति षट्चत्वारिंशत् शतं। तत्र मिथ्यादृष्टौ सत्त्वं पंचचत्वारिंशत् शतं, तन्मिश्रवामे तीर्थं नहीत्युक्तत्वात्। असत्त्वमेकं। सासादने असत्त्वं त्रयं, सत्त्वं त्रिचत्वारिंशत् शतं। असंयतेऽसत्त्वं शून्यं सत्त्वं षट्चत्वारिंशत् शतं। सयोगे सत्त्वं पंचाशीतिः। असत्त्वमेकषष्टिः।

कार्मणयोगे चतुर्गतिभुज्यमानायुःसंभवात् मिथ्यादृष्टौ सत्त्वमष्टचत्वारिंशत् शतं, सासादने सत्त्वं चतुश्चत्वारिंशत् शतं, असत्त्वं तीर्थाहारनरकायूंषि। असंयते सत्त्वमष्टचत्वारिंशत् शतं। सयोगे सत्त्वं पंचाशीतिः। असत्त्वं त्रिषष्टिः ॥ ३५३ ॥ अथ वेदमार्गणादिष्वाह—

स० चं०—औदारिक मिश्रयोगविषैं देवायु नरकायु विना सामान्यवत् सत्व प्रकृति एकसौ छियालिस तहां 'तम्मिस्सवामगे ण हि तित्थं' इस वचनतैं मिथ्यादृष्टिविषैं असत्व एक तीर्थंकर सत्व एकसौ पैंतालीस सासादनविषैं तीर्थंकर आहारकद्विक ए असत्व तीन सत्व एकसौ तियालीस असंयतविषैं असत्व शून्य सत्व एकसौ छियालीस सयोगी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषैं सत्व पिच्यासी असत्व इकसठि बहुरि कार्माणकाय योगविषैं च्यार्‍यो भुज्यमान आयु संभवै हैं तातैं सत्व प्रकृति एकसौ अठतालीस तहां मिथ्यादृष्टि असंयतविषैं सत्व सर्व असत्व नास्ति। सासादनविषैं तीर्थंकर आहारक द्विक नरकायु ए असत्व च्यारि सत्व एकसौ चवालीस। सयोगीविषैं असत्व त्रेसठि सत्व पिच्यासी ॥ ३५३ ॥
आगै वेदमार्गणादिक विषैं कहैं हैं—

वेदादाहारोत्ति य सगुणोघं णवरि संढथीखवगे।
किण्हदुगसुहतिलेस्सियवामेवि ण तित्थयरसत्तं ॥३५४॥

वेदादाहार इति च स्वगुणौघः नवरि षंढस्त्रीक्षपके।
कृष्णद्विकशुभत्रिलेश्यिकवामेऽपि न तीर्थंकरसत्वं ॥ ३५४ ॥

जी० प्र०—वेदमार्गणातः आहारमार्गणापर्यंतं स्वगुणौघः इति पुंवेदे सत्त्वमष्टचत्वारिंशत् शतं। गुणस्थानानि चतुर्दश। रचना गुणस्थानोक्तैव। षंढस्त्रीवेदयोः सत्त्वमष्टचत्वारिंशत् शतं किंतु क्षपकश्रेण्यां न तीर्थंकरसत्त्वं तत्सत्त्वे तदुदयसंक्लिष्टस्य तत्रारोहणाभावात्, तेनापूर्वकरणादिषु सत्त्वमेकैकहीनं स्यात्।

कषायमार्गणायां सत्त्वमष्टचत्वारिंशत् शतं। गुणस्थानानि क्रोधादित्रयेऽनिवृत्तिकरणांतानि नव। लोभे सूक्ष्मसांपरायांतानि दश संदृष्टिर्गुणस्थानवत्।

ज्ञानमार्गणायां कुमतित्रये सत्त्वमष्टचत्वारिंशच्छतं। तत्र मिथ्यादृष्टावसत्त्वं शून्यं, सत्वं सर्वं। सासादनेऽसत्वं त्रयं। सत्वं पंचचत्वारिंशच्छतं। मतित्रये सत्वमष्टचत्वारिंशच्छतं गुणस्थानान्यसंयतादीनि नव। संदृष्टिस्तदुक्तैव। मनःपर्यये नरकतिर्यगायुरभावात्सत्वं षट्चत्वारिंशच्छतं। गुणस्थानानि प्रमत्तादीनि सप्त, संदृष्टिस्तद्वत्। केवलज्ञाने सत्वं पंचाशीतिः सयोगायोगगुणस्थानद्वयं। गुणस्थानातीताः सिद्धाः।

संयममार्गणायामसंयमे सत्वमष्टचत्वारिंशच्छतं। गुणस्थानानि मिथ्यादृष्ट्यादीनि चत्वारि संदृष्टिस्तदुक्तैव। देशसंयते सत्वं नरकायुरभावात्सप्त-

असंयमयोग्यसत्वं १४८

	मि	सा	मि	अ
स	१४८	१४५	१४७	१४८
अ	०	३	१	०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चत्वारिंशच्छतं । गुणस्थानं तन्नाम । सामायिकछेदोपस्थापनयोर्नरकतिर्यगायुषी नेति सत्वं षट्चत्वारिंशच्छतं गुणस्थानानि प्रमत्तादीनि चत्वारि । संदृष्टिस्तदुक्तैव । परिहारविशुद्धौ सत्वं तदायुर्द्वयाभावात् षट्चत्वारिंशच्छतं गुणस्थानं प्रमत्ताप्रमत्तद्वयं । सूक्ष्मसांपराये गुणस्थानं तन्नामैव सत्वं द्व्युत्तरशतं । यथाख्याते गुणस्थानानि चत्वारि तत्रोपशांतकषाये सत्वं षट्चत्वारिंशच्छतं अष्टत्रिंशच्छतं च । क्षीणकषाये एकोत्तरशतं । सयोगे पंचाशीतिः । अयोगे द्विचरमसमयांतं पंचाशीतिः, चरमसमये त्रयोदश ।

दर्शनमार्गणायां चक्षुरचक्षुर्दर्शनयोः सत्वमष्टचत्वारिंशच्छतं । गुणस्थानान्याद्यानि द्वादश । संदृष्टिस्तदुक्तैव । अवधिदर्शने सत्वमष्टचत्वारिंशच्छतं गुणस्थानान्यसंयतादीनि नव । रचना तदुक्तैव । केवलदर्शने तज्ज्ञानवत् ।

लेश्यामार्गणायां कृष्णनीलयोः सत्वमष्टचत्वारिंशच्छतं गुणस्थानानि मिथ्यादृष्ट्यादीनि चत्वारि । तत्र किण्हदुगवामे णा तित्थयरसत्तमितिमिथ्यादृष्टौ सत्वं सप्तचत्वारिंशच्छतं । अशुभलेश्यात्रये तीर्थबंधप्रारंभाभावात् । बद्धनारकायुषोऽपि द्वितीयतृतीयपृथ्व्योः कपोतलेश्ययैव गमनात् । संदृष्टिः—

कृष्ण नी= योग्य १४८

व्यु	मि	सा	मि	अ
स	१४७	१४५	१४७	१४८
अ	ती १	३	ती १	०

कपोतलेश्यायां मिथ्यादृष्टौ सत्त्वमष्टचत्वारिंशत् शतं । सासादने पंचचत्वारिंशत् शतं । मिश्रे सप्तचत्वारिंशत् शतं । असंयते सर्वं । तेजःपद्मलेश्ययोः सत्त्वमष्टचत्वारिंशत् शतं गुणस्थानानि सप्त । तत्र सुहतियलेस्सियवामेवि णा तित्थयरसत्तमिति तन्मिथ्यादृष्टौ तीर्थसत्त्वं नास्ति, कुतः ? नरकगमनाभिमुखसंक्लिष्टेभ्योऽन्येषां सम्यक्त्वविराधनाभावेन शुभलेश्यात्रये तद्विराधनासंभवात् । तेन तन्मिथ्यादृष्टौ सत्त्वं सप्तचत्वारिंशत् शतं । सासादने पंचचत्वारिंशत् शतं । मिश्रे सप्तचत्वारिंशच्छतं । असंयते अष्टचत्वारिंच्छतं देशसंयते नरकायुर्विना सप्तचत्वारिंशच्छतं । प्रमत्ते नरकतिर्यगायुषी विना षट्चत्वारिंशत् शतं । अप्रमत्तेऽपि तथैव षट्चत्वारिंशत् शतं ।

शुक्ललेश्यायां सत्त्वमष्टचत्वारिंशत् शतं । गुणस्थानानि मिथ्यादृष्ट्यादीनि त्रयोदश । तत्रापि मिथ्यादृष्टौ तीर्थासत्वात् सत्त्वं सप्तचत्वारिंशत् शतं । सासादनादिषु गुणस्थानोक्तैव संदृष्टिः ।

भव्यमार्गणायां सत्त्वमष्टचत्वारिंशत् शतं । गुणस्थानानि चतुर्दश, संदृष्टिस्तदुक्तैव ॥ ३५४ ॥

स० चं०—वेदमार्गणातैं लगाय आहारमार्गणापर्यंत अपने अपने गुणस्थानवत् सामान्य रचना है । तहां पुरुषवेदविषैं सत्व प्रकृति एकसौ अठतालीस गुणस्थान चौदह तहां रचना सर्व गुणस्थानवत् जाननी । बहुरि न-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि केवल दर्शनविषैं रचना केवलज्ञानवत् जाननी। बहुरि लेश्यामार्गणाविषैं कृष्ण नीलविषैं सत्व प्रकृति एकसौ अठतालीस गुणस्थान मिथ्यादृष्ट्यादिक च्यारि, 'तहां किण्हदुगेवामे ण तित्थयरसत्तं' इस वचनतैं मिथ्यादृष्टि-विषैं तीर्थंकर सत्व नाहीं जातैं तीन अशुभलेश्याविषैं तीर्थंकर का प्रारंभ न होय बहुरि जाकैं नरकायु बंध्या होइ सो दूसरी तीसरी पृथ्वीविषैं उपजै तहां भी कपोतलेश्या पाइए तातैं एकसौ सैंतालीसका सत्व है। बहुरि सासादनादिकविषैं गुणस्थानवत् रचना है। बहुरि कपोतलश्याविषैं सत्व एकसौ अठतालीस गुणस्थान च्यारि आदिके तहां रचना गुणस्थानवत् जाननी। बहुरि तेजः पद्म लेश्याविषैं,सत्व एकसौ अठतालीस गुणस्थान सात आदिके तहां सुहतियलेस्सियवामे वि ण तित्थयरसत्तं, इस वचनतैं मिथ्यादृष्टिविषैं तीर्थंकर सत्व नाहीं जातैं तीर्थंकर सत्तावाला जो नरक जानेकौं सन्मुख होइ तिसहीकैं सम्यक्त्वकी विराधना होइ है। तीनों शुभ लेश्याविषैं सम्यक्त्वकी विराधना होइ नाहीं तातैं तहां सत्व एकसौ सैंतालीस बहुरि सासादनादिकविषैं गुणस्थानवत् रचना जाननी। बहुरि शुक्ल लेश्याविषैं सत्व एकसौ अठतालीस गुणस्थान मिथ्यादृष्ट्यादिक तेरह तहां मिथ्यादृष्टि विषैं तीर्थंकरकी सत्ता नाहीं तातैं सत्व एकसौ सैंतालीस। सासादनादिकविषैं गुणस्थानवत् रचना जाननी। बहुरि भव्य मार्गणाविषैं सत्व एकसौ अठतालीस गुणस्थान चौदह तहां रचना गुणस्थानवत् जाननी॥ ३५४॥

अभव्वसिद्धे णत्थि हु सत्तं तित्थयरसम्ममिस्साणं।
आहारचउक्कस्सवि असण्णिजीवे ण तित्थयरं॥३५५॥

अभव्यसिद्धे नास्ति हि सत्त्वं तीर्थकरसम्यग्मिश्राणां।
आहारचतुष्कस्यापि असंज्ञिजीवे न तीर्थकरं॥ ३५५॥

जी० प्र०—अभव्यमार्गणायां तीर्थकरसम्यक्त्वमिश्राणामाहारकचतुष्कस्य च सत्त्वं नास्ति, तस्य सम्यग्दर्शनाद्यभिव्यक्तेः सर्वकालेऽप्यसंभवात्। गुणस्थानं मिथ्यादृष्टिसंज्ञं। सत्त्वमेकचत्वारिंशच्छतं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुंसक वेद स्त्रीवेदविषैं सत्व प्रकृति एकसौ अठतालीस तहां 'णवरि संढथी खवगे' इस वचनकरि क्षपक श्रेणीविषैं तीर्थंकरका सत्व नाहीं तातैं अपूर्वकरणादिकविषैं सत्व प्रकृति गुणस्थानोक्त सत्व प्रकृतितैं एक २ घाटि जाननी। और रचना सर्व गुणस्थानवत् जाननी। बहुरि कषायमार्गणाविषैं सत्व एकसौ अठतालिस गुणस्थान क्रोध मान मायाविषै अनिवृत्ति करणपर्यंत नव लोभविषैं सूक्ष्मसांपराय पर्यंत दश तहां रचना सर्व गुणस्थानवत् जाननी। बहुरि ज्ञानमार्गणाविषैं कुमति कुश्रुत विभंगविषैं सत्व एकसौ अठतालीस गुणस्थान मिथ्यादृष्टि सासादन दोय तहां रचना गुणस्थानवत्। बहुरि मति श्रुत अवधिविषैं सत्व प्रकृति एकसौ अठतालीस गुणस्थान असंयतादिक नव तहां रचना गुणस्थानवत् जाननी। बहुरि मनःपर्ययविषैं नरक तिर्यंचायुविना सत्व प्रकृति एकसौ छियालीस गुणस्थान प्रमत्तादिक सात तहां सत्व गुणस्थानवत् असत्व गुणस्थानोक्त असत्वतैं दोय दोय घाटि जानना बहुरि केवलज्ञानविषैं सत्वप्रकृति पिच्यासी गुणस्थान सयोगी अयोगी दोय तहां सत्व गुणस्थानवत् असत्व सयोगी विषैं नास्ति अयोगीविषैं द्विचरम समय पर्यंत नास्ति चरम समयविषैं बहत्तरि। बहुरि संयम मार्गणाविषैं असंयतविषैं सत्व एकसौ अठतालीस गुणस्थान मिथ्यादृष्ट्यादिक च्यारि तहां रचना गुणस्थानवत् जाननी। बहुरि देशसंयतविषैं नरकायु विना सत्व एकसौ सैंतालीस गुणस्थान एक देशसंयत बहुरि सामायिक छेदोपस्थापनविषैं नरक तिर्यंचायु विना सत्व एकसौ छियालीस गुणस्थान प्रमत्तादिक च्यारि तहां सत्व गुणस्थानोक्त, असत्व गुणस्थानोक्ततैं दोय घाटि जानना। बहुरि परिहार विशुद्धिविषैं सत्व पूर्वोक्त एकसौ छियालीस गुणस्थान प्रमत्त अप्रमत्त दोय बहुरि सूक्ष्म सांपरायविषैं सत्व एकसौ दोय गुणस्थान एक सूक्ष्मसांपराय बहुरि यथाख्यातविषैं गुणस्थान च्यारि तहां उपशांत कषायविषैं सत्व एकसौ छियालीस अथवा एकसौ अठतीस क्षीणकषायविषैं एकसौ एक सयोगीविषैं पिच्यासी अयोगीविषैं द्विचरम समय पर्यंत पिच्यासी चरम समयविषैं तेरह हैं। बहुरि दर्शनमार्गणाविषैं चक्षु अचक्षु दर्शनविषैं सत्व एकसौ अठतालीस गुणस्थान आदिके बारह तहां गुणस्थानोक्तवत् रचना है। बहुरि अवधिदर्शनविषैं सत्व एकसौ अठतालीस गुणस्थान असंयतादिक नव तहां रचना गुणस्थानोक्त है

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यक्त्वमार्गणायां—मिथ्यारुचीनां सत्त्वमष्टचत्वारिंशच्छतं। सासादनरुचीनां पंचचत्वारिंशच्छतं। मिश्ररुचीनां सप्तचत्वारिंशच्छतं। उपशमसम्यक्त्वेऽष्टचत्वारिंशच्छतं। तत्रासंयतादूयुपशांतकषायांतान्यष्टौ गुणस्थानानि। संदृष्टिः—

उपशमसम्यक्त्वयोग्य १४८

व्यु	अ१	दे१	प्र	अ	अ	अ	सू	उ
स	१४८	१४७	१४६	१४६	१४६	१४६	१४६	१४६
अ	०	१	२	२	२	२	२	२

वेदकसम्यक्त्वे सत्त्वमष्टचत्वारिंच्छतं। असंयतादिचतुर्गुणस्थानानि। संदृष्टिः—

वेदकयोग्य १४८

व्यु	अ१	दे१	प्र०	अ०
स	१४८	१४७	१४६	१४६
अ	०	१	२	२

क्षायिकसम्यक्त्वे सत्त्वं सप्तप्रकृत्यभावादेकचत्वारिंशच्छतं। तत्रासंयते नरकतिर्यगायुषी व्युच्छित्तिः। कुतः? क्षायिकसम्यग्दृष्टिर्देशसंयतो मनुष्य एवेति कारणात्। सत्त्वमेकचत्वारिंशच्छतं। देशसंयते एकान्नचत्वारिंशच्छतं। प्रमत्तेऽप्येकान्नचत्वारिंशच्छतं। अप्रमत्ते क्षपकश्रेण्यपेक्षया देवायुर्व्युच्छित्तिः। सत्त्वमेकोनचत्वारिंशच्छतं। अपूर्वकरणे उभयश्रेण्यपेक्षयाऽष्टत्रिंशच्छतं। अनिवृत्तिकरणादिषु गुणस्थानवत्।

संज्ञिमार्गणायां सामान्यसत्त्वमष्टचत्वारिंशच्छतं। गुणस्थानानि मिथ्यादृष्ट्यादीनि द्वादश विशेषो न।

असंज्ञिमार्गणायां 'ण तित्थयरमिति सत्वं सप्तचत्वारिंशच्छतं। मिथ्यादृष्टावपि तथा। सासादने पंचचत्वारिंशच्छतं।

आहारमार्गणायां—सत्वमष्टचत्वारिंशच्छतं। गुणस्थानानि सयोगांतानि त्रयोदश। विशेषो नास्ति॥ ३५५॥

स० चं०—अभव्य मार्गणा विषैं तीर्थंकर १ सम्यक्त्व मोहनी १ मिश्रमोहनी १ आहारक शरीर अगोपांग बंधन संघात ए च्यारि ४ इन सातका सत्व नाहीं जातैं वाके कदाचित् सम्यग्दर्शनादिक की प्रगटता नाहीं तातैं सत्व एकसौ इकतालीस गुणस्थान एक मिथ्यादृष्टि। बहुरि सम्यक्त्व मार्गणा विषैं मिथ्यारुचि विषैं सत्व एकसौ अडतालीस गुणस्थान एक मिथ्यादृष्टि, सासादन रुचि विषैं तीर्थंकर आहारक द्विक विना सत्व एकसौ पैंतालीस

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणस्थान एक सासादन मिश्र रुचि विषैं तीर्थंकर विना सत्व एकसौ सैंतालीस गुणस्थान एक मिश्र उपशम सम्यक्त्व विषैं सत्व प्रकृति एकसौ अठतालीस गुणस्थान असंयतादिक आठ तहां असंयतविषैं असत्व नास्ति सत्व सर्व, देशसंयतविषैं असत्व नरकायु सत्व एकसौ सैंतालीस प्रमत्तादि उपशांत मोह पर्यंतविषैं असत्व नरकायु तिर्यंचायु दोय सत्व एकसौ छियालीस बहुरि वेदक सम्यक्त्वविषैं सत्व एकसौ अठतालीस गुणस्थान अविरतादिक च्यारि तहां रचना गुणस्थानवत् बहुरि क्षायिक सम्यक्त्वविषैं च्यारि अनंतानुबंधी तीन दर्शन मोहनीका अभाव है तातैं सत्व प्रकृति एकसौ इकतालीस गुणस्थान असंयतादिक ग्यारह तहां असंयतविषैं असत्व नास्ति सत्व एकसौ इकतालीस इहां ही नरकायु तिर्यंचायुकी व्युच्छित्ति भई जातैं क्षायिकसम्यक्त्वी तिर्यंच देशगुणस्थानवर्ती न होइ, यातैं देशसंयतविषै असत्व दोय सत्व एकसौ गुणतालीस बहुरि प्रमत्त अप्रमत्तविषैं भी एकसौ गुणतालीस सत्व है बहुरि अपूर्वकरण विषैं दोऊ श्रेणीनिकी अपेक्षा सत्व एकसौ अठतीस है। बहुरि अनिवृत्तिकरणादिक विषैं गुणस्थानवत् कथन जानना। बहुरि संज्ञीमार्गणाविषैं सत्व एकसौ अठतालीस गुणस्थान मिथ्यादृष्ट्यादिक बारह, रचना गुणस्थानवत् जाननी। बहुरि असंज्ञी मार्गणाविषैं 'ण तित्थयरं' इस वचनतैं तीर्थंकर विना सत्व एकसौ सैंतालीस तहां मिथ्यादृष्टिविषैं असत्व नास्ति सत्व सर्व सासादनविषैं असत्व आहारक द्विक अर सत्व एकसौ पैंतालीस है। बहुरि आहार मार्गणाविषैं सत्व एकसौ अठतालीस गुणस्थान सयोगी पर्यंत तेरह तहां रचना गुणस्थानवत् जाननी ॥ ३५५ ॥

कम्मेवाणाहारे पयडीणं सत्तमेवमादेसे ।
कहियमिणं बलमाहवचंदच्चियणेमिचंदेण ॥३५६॥

कार्मे एवानाहारे प्रकृतीनां सत्वमेवमादेशे ।
कथितमिदं बलमाधवचंद्रार्चितनेमिचंद्रेण ॥ ३५६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—अनाहारमार्गणायां कार्मणयोगवत्, संदृष्टिः—

अनाहारयोग्य १४८

व्यु	मि	सा	अ६३	स	अ७२	१३
स	१४८	१४४	१४८	८५	८५	१३
अ	०	४	०	६३	६३	१३५

एवं मार्गणास्थाने प्रकृतिसत्वमिदं प्रत्यक्षवंदारुभ्यां बलदेववासुदेवाभ्यामर्चितनेमिचंद्रतीर्थंकरेण अथवा बलदेवभ्रात्रा श्रीमाधवचंद्रत्रैविद्यदेवेनार्चितनेमिचंद्रसिद्धांतचक्रवर्तिना निरूपितं ॥ ३५६ ॥

स० चं०—अनाहार मार्गणा विषैं कार्माण काय योगवत् रचना जाननी तहां मिथ्यादृष्टि सासादन अविरत सयोगीविषैं कार्माण काय योगवत् रचना है अर अयोगीविषैं अयोगी गुणस्थानवत् रचना है। ऐसैं यहु मार्गणा स्थान विषैं प्रकृतिनिका सत्व सो प्रत्यक्ष बंदनेवाले ऐसे बलभद्र अर माधव कहिए वासुदेव तिन कर अर्चित पूजित ऐसा जु नेमिचंद्र तीर्थंकर देव ताकरि निरूपण कीया है। अथवा बलदेव अपना भाई अर माधवचंद्र त्रैविद्यदेव इन करि पूजित ऐसा जु नेमिचंद्र सिद्धांतचक्रवर्ती ताकरि निरूपण कीया है ॥ ३५६ ॥

सो मे तिहुवणमहियो सिद्धो बुद्धो णिरंजणो णिच्चो।
दिसदु वरणाणलाहं बुहजणपरिपत्थणं परमसुद्धं ॥३५७॥

स मे त्रिभुवनमहितः सिद्धो बुद्धो निरंजनो नित्यः।
दिशतु वरज्ञानलाभं बुधजनपरिप्रार्थनं परमशुद्धं ॥ ३५७ ॥

जी० प्र०—स मे त्रिभुवनमहितः सिद्धो बुद्धो निरंजनो नित्यः दिशतु वरज्ञानलाभं बुधजनपरिप्रार्थितं परमशुद्धं ॥ ३५७ ॥

इत्याचार्यश्रीनेमिचन्द्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ जीवतत्त्वप्रदीपिकाख्यायां
कर्मकांडे बंधोदयसत्त्वप्ररूपणो नाम द्वितीयोऽधिकारः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—सो श्रीनेमिचंद्र स्वामी तीन भुवन करि पूजित है सिद्ध है बुद्ध है निरंजन है नित्य है सो जाकौं बुध ज्ञानी जन प्रार्थना करैं जाचैं बहुरि जो परम शुद्ध होइ ऐसा वर उत्कृष्ट ज्ञान लाभकौं मोकूं द्यो-प्राप्त करो।

सोरठा—बंध उदय फुनि सत्त्व इस अधिकार विषैं कहे।
इनका जाने तत्त्व सो ज्ञानी शिव पद लहै ॥ २ ॥

इति आचार्य श्रीनेमिचंद्रविरचित गोम्मटसार द्वितीय नाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृतटीकाके अनुसारि सम्यग्ज्ञानचंद्रिका नामा भाषा टीकाविषै कर्मकांडविषै बंधोदयसत्वनिरूपण नामा दूसरा अधिकार संपूर्ण भया ॥ २ ॥

अथ सत्वस्थानभंगाधिकार ॥ ३ ॥

णमिऊण वड्ढमाणं कणयणिहं देवरायपरिपुज्जं।
पयडीण सत्तठाणं ओघे भंगे समं वोच्छं ॥३५८॥

नत्वा वर्धमानं कनकनिभं देवराजपरिपूज्यं।
प्रकृतीनां सत्त्वस्थानमोघे भंगेन समं वक्ष्यामि ॥ ३५८ ॥

जी० प्र०—कनकवर्णं देवराजपरिपूज्यं श्रीवीरवर्धमानस्वामिनं नत्वा प्रकृतीनां सत्त्वस्थानं गुणस्थानेषु भंगसहितं वक्ष्यामि। किं स्थानं ? को वा भंगः ? संख्याभेदेनैकस्मिन् जीवे युगपत्संभवत्प्रकृतिसमूहः स्थानं। अभिन्नसंख्यानां प्रकृतीनां परिवर्तनं भंगः, संख्याभेदेनैकत्वे प्रकृतिभेदेन वा भंगः ॥ ३५८ ॥ गुणस्थानेषु स्थानभंगप्रतिपादनप्रकारमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दोहा—करि विशेष सत्ता सहित अष्ट कर्म अरि नाश।
महावीर जयवंत जगि धारो ज्ञान प्रकाश ॥ ३ ॥

स०चं०—कनक जो सोनौ तीहि सारिखा वर्णसंयुक्त बहुरि देवनिका राजा जो इंद्र ताकरि सर्व प्रकार पूज्य ऐसा वीर वर्धमान तीर्थंकर देवकौं नमस्कार करि ओघ जो गुणस्थान तिन विषैं भंगनिकरि सहित प्रकृतिनिका सत्व स्थान कहोंगा। तथा स्थान कहा ? अर भंग कहा ? सो कहिए है—

संख्या भेद करि एक काल एकै जीवविषैं जो प्रकृतिनिका समूह संभवै सो स्थान है। बहुरि एक संख्या रूप जे प्रकृति तिनविषै प्रकृतिनिका पलटना सो भंग है। अथवा संख्या भेदकरि एकत्वविषैं प्रकृति भेद करि भंग हो है। भावार्थ—एक जीवकैं एक कालविषैं जितनी प्रकृतिनिकी सत्ता पाइए तिनकै समूहका नाम स्थान कहिए सो जहां अन्य अन्य संख्याकौं लीएं प्रकृतिनिकी सत्ता पाइए तहां अन्य अन्य स्थान कहिए है।

जैसैं केई जीवनिकी एकसौ छियालीसकी सत्ता पाइए केई जीवनिकैं एकसौ पैंतालीसकी सत्ता पाइए तो इहां दोय स्थान भए ऐसैं ही सर्वत्र जानना। बहुरि जहां एक ही स्थानविषैं प्रकृतिनिका बदलना संभवै सो भंग कहिए जैसैं केई जीवनिकै मनुष्यायु अर देवायुकी सत्तासहित एकसौ पैंतालीसकी सत्ता पाइए है। केई जीवनिकैं तिर्यंचायु नरकायुकी सत्ता सहित एकसौ पैंतालीसकी सत्ता पाइए है तौ यहां स्थान तो एकही भया जातैं संख्या एक है बहुरि भंग अन्य भया जातैं प्रकृति बदली गई तहां मनुष्यायु देवायुकी सत्ता है, वहां तिर्यंचायु नरकायु की सत्ता है सो ऐसैंही सर्वत्र अन्य अन्य प्रकृतिनिकी संख्यातैं स्थान भेद हो है। बहुरि एक स्थान विषैं कोई प्रकृति अन्य अन्य होनेतैं भंग भेद हो है ऐसैं जानना ॥ ३५८ ॥ आगैं गुणस्थानविषैं स्थान अर भंग कहनेका विधान कहै हैं—

आउगबंधाबंधणभेदमकाऊण वण्णणं पढमं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भेदेण य भंगसमं परूवणं होदि बिदियम्हि ॥३५९॥

आयुष्कबंधाबंधनभेदमकृत्वा वर्णनं प्रथमं ।
भेदेन च भंगसमं प्ररूपणं भवति द्वितीयस्मिन् ॥ ३५९ ॥

जी० प्र०—आयुर्बंधाबंधभेदमकृत्वा प्रथमं वर्णनं भवति । द्वितीयस्मिन्नायुर्बंधाबंधभेदेन सह भंगसहितं प्ररूपणं भवति ॥ ३५९ ॥ तत्र प्रथमपक्षे आह—

स० चं०—आयुके बंधका वा आयुके अबंधका भेदकौं न करि पाहिला वर्णन है बहुरि दूसरा वर्णन विषैं आयुका बंधका वा अबंधका भेदसहित प्ररूपण है ॥ ३५९ ॥ तहां प्रथम पक्ष विषैं आयुका बंध अबंध विशेष विना कीएं जो सामान्य वर्णन तीहि विषैं कैसैं सत्ता पाइए सो कहै हैं—

सव्वं तिगेग सव्वं चेगं छसु दोण्णि चउसु छद्दस य दुगे ।
छस्सगदालं दोसु तिसट्ठी परिहीण पडि सत्तं जाणे ॥ ३६० ॥

सर्वं त्रिकैकं सर्वं चैकं षट्सु द्वयं चतुर्षु षट् दश च द्विके ।
षट्सप्तचत्वारिंशत् द्वयोस्त्रिषष्टिः परिहीनं प्रति सत्त्वं जानीहि ।

जी० प्र०—मिथ्यादृष्टौ सत्त्वं सर्वमष्टचत्वारिंशच्छतं । सासादने तदेव तीर्थाहारकद्विकहीनं । मिश्रे तीर्थहीनं । असंयतेऽसर्वं । देशसंयते नरकायुर्हीनं । प्रमत्तादिषु षट्सु नरकतिर्यगायुर्हीनं । पुनरपूर्वकरणादिषु चतुर्षु नरकतिर्यगायुरनंतानुबंधिचतुष्कहीनं । क्षपकापूर्वकरणादिद्वये नरकतिर्यग्देवायुःसप्तप्रकृतिहीनं । सूक्ष्मसांपराये सोलट्ठिक्किगिछक्कं चदुसेक्कमिति षट्चत्वारिंशता हीनं । क्षीणकषाये लोभसहितया हीनं । सयोगायोगयोः घातिसप्तचत्वारिंशता नामकर्मत्रयोदशभिरायुस्त्रयेण च हीनं । चशब्दादयोगिचरमसमये पंचत्रिंशच्छतहीनं जानीहि ॥ ३६० ॥ ता अपनीतप्रकृतीराह—

स० चं०—मिथ्यादृष्टि विषैं सत्व सर्व एकसौ अठतालीस है सासादन विषैं तीर्थंकर आहारक द्विक इन तीन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

विना एकसौ पैंतालीस सत्व है। मिश्रविषैं एक तीर्थंकर विना एकसौ सैंतालीस सत्व है। असंयत विषैं सर्व एकसौ अठतालीस सत्व है। देश संयतविषैं एक नरकायुविना एकसौ सैंतालीस सत्व है। प्रमत्तादिक छह गुणस्थानविषैं उपशम सम्यक्त्व अपेक्षा नरकायु तिर्यंचायु इन दोय विना एकसौ छियालीस सत्व है बहुरि अपूर्वकरणादिक च्यारि गुणस्थाननिविषैं अनंतानुबंधी विसंयोजना करनेकी अपेक्षा नरकायु तिर्यंचायु अनंतानुबंधीचतुष्क इन छहो विना एकसौ बियालीसका भी सत्व पाइए है। बहुरि क्षपक श्रेणी अपेक्षा अपूर्वकरणादिक दोय गुणस्थाननिविषैं नरकायु तिर्यंचायु देवायु तीन दर्शन मोह अनंतानुबंधी चतुष्क इन दश विना एकसौ अठतीस सत्व है। सूक्ष्म सांपरायविषैं अनिवृत्तिकरणमें व्युच्छित्ति भई सोलह आठ एक एक छह एक एक एक एक तिन सहित छियालीस विना एकसौ दोय सत्व है। क्षीण कषायविषैं लोभ सहित सैंतालीस विना एकसौ एक सत्व है। सयोगी अयोगीविषैं घातियानिकी सैंतालीस नाम कर्मकी तेरह तीन आयु इन तरेसठ विना पिच्यासी सत्व है चकारतैं अयोगीका अंत समयविषैं एकसौ पैंतीस विना तेरह सत्व है ऐसैं सत्व जानहु॥ आगैं जे ए प्रकृति घटाईं तिनके नाम कहै हैं—

सासणमिस्से देसे संजददुग सामगेसु णत्थी य।
तित्थाहारं तित्थं णिरयाऊ णिरयतिरियआउअणं॥३६१॥

सासादनमिश्रे देशे संयतद्विके शामकेषु नास्ति च।
तीर्थाहारं तीर्थं निरयायुर्निरयातिर्यगायुरनं॥ ३६१॥

जी० प्र०—सासादने मिश्रे देशसंयते संयतद्विके उपशमके चापनीतप्रकृतयः क्रमेण तीर्थाहारत्रयं तीर्थं नरकायुष्यं नरकतिर्यगायुर्द्वयं नरकतिर्ये-

१		मि	सा	मि	अ	दे	प्र	अ	अ	उ	क्षी	अ	उ	क्षी	सू	उ	क्षी	उ		क्षी	स	अ	चरम
	स	१४८	१४५	१४७	१४८	१४७	१४६	१४६	१४६	१४२	१३८	१४६	१४२	१३८	१४६	१४२	१०२	१४६	१४२	१०१	८५	८५	१३
	अ	०	३	१	०	१	२	२	२	६	१०	२	६	१०	२	६	४६	२	६	४७	६३	६३	१२५

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गायुषी अनंतानुबंधिचतुष्कं चेति षट्। चशब्दात् क्षपकेषु। दस य दुगे इत्यादिनोक्तप्रकृतयोऽपि ज्ञातव्याः। अथ गुणस्थानेषु स्थानसंख्या गाथाद्वयेनाह—

स० चं०—सासादनविषैं मिश्रविषैं देशसंयतविषैं संयतद्विक प्रमत्त अप्रत्त तिन विषै उपशम श्रेणीविषैं अनुक्रमतैं तीर्थंकर आहारकद्विक ए तीन बहुरि तीर्थंकर बहुरि नरकायु बहुरि नरकायु तिर्यंचायु ए दोय बहुरि नरकायु तिर्यंचायु अनंतानुबंधी ए छह ऐसैं सत्व विषैं घटाई हुई प्रकृति जाननी। चकारतैं क्षपक श्रेणीविषैं 'दश य दुगे' इत्य दि पूर्वोक्त प्रकार घाटि प्रकृति जाननी ॥३६१॥ आगैं गुणस्थान विषैं आयुके बंध अबंधका भेद लीएं विशेष वर्णन कहे हैं तहां स्थान संख्या दोय गाथानिकरि कहे हैं—

बिगुणणव चारि अट्ठं मिच्छातिये अयदचउसु चालीसं।
तिय उवसमगे संते चउवीसा हौंति पत्तेयं ॥३६२॥
चउछक्कादि चउअट्ठं चउछक्क य हौंति सत्तठाणाणि।
आउगबंधाबंधे अजोगिअंते तदो भंगा ॥३६३॥ जुम्मं।

द्विगुणनव चत्वारि अष्ट मिथ्यत्रये अयतचतुर्षु चत्वारिंशत्।
त्रीणि उपशामके शांते चतुर्विंशतिः भवंति प्रत्येकं ॥ ३६२ ॥
चतुः षट्कृतिः चतुरष्ट चतुःषट्कं च भवंति सत्त्वस्थानानि।
आयुष्कबंधाबंधे अयोग्यंते ततो भंगाः ॥ ३६३ ॥ युग्मं ॥

जी० प्र०—मिथ्यादृष्टौ सत्त्वस्थानान्यष्टादश, सासादने चत्वारि, मिश्रेऽष्टौ, असंयतादिषु चतुर्षु प्रत्येकं चत्वारिंशत्, त्रिषूपशमकेषूपशांते च प्रत्येकं चतुर्विंशतिः, क्षपकापूर्वकरणे चत्वारि, अनिवृत्तिकरणे षट्त्रिंशत्, सूक्ष्मसांपराये चत्वारि, क्षीणकषायेऽष्टौ, सयोगे चत्वारि, अयोगे षट्। एवमायुर्बंधाबंधविवक्षायामयोग्यंतगुणस्थानेषु सत्त्वस्थानान्युक्तानि ॥ ३६२–३६३ ॥ ततोऽग्रे तेषां भंगसंख्यामाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—मिथ्यादृष्टिविषैं नवके दूणे अठारह सत्व स्थान हैं । सासादनविषैं च्यारि हैं। मिश्रविषैं आठ हैं। असंयतादिक च्यारि गुणस्थाननिविषैं प्रत्येक चालीस चालीस सत्व स्थान हैं। अपूर्वकरणादिक तीन उपशम श्रेणी युक्त अर उपशांत कषाय इनविषैं प्रत्येक चौवीस चौवीस सत्व स्थान हैं। क्षपक श्रेणीविषैं अपूर्वकरणविषैं तो च्यारि अनिवृत्तिकरणविषैं छत्तीस, सूक्ष्मसांपरायविषैं च्यारि, क्षीणकषायविषैं आठ, सयोगीविषैं च्यारि, अयोगीविषैं छह सत्व स्थान हैं। ऐसैं आयुका बंध वा अबंधका विवक्षाविषैं अयोगीपर्यंत गुणस्थाननिविषैं सत्व स्थान हैं ॥ ३६२-३६३ ॥ ताके आगैं इन स्थाननिके भंगनिकी संख्या कहै हैं—

पण्णास बार छक्कादि वीससयं अट्ठदाल दुसु दालं।
अडवीसा बासट्ठी अडचउवीसा य अट्ठ चउ अट्ठ ॥३६४॥

पंचादश द्वादश षट्कृतिः विंशशतं अष्टचत्वारिंशत् द्वयोः चत्वारिंशत्।
अष्टविंशतिः द्वाषष्टिः अष्टचतुर्विंशतिः च अष्ट चत्वारि अष्ट ॥ ३६४ ॥

जी० प्र०—मिथ्यादृष्टावष्टादशस्थानानां भंगाः पंचाशत् । सासादनस्य चतुर्णां द्वादश । मिश्रस्याष्टानां षट्त्रिंशत् । असंयतस्य चत्वारिंशतो विंशत्युत्तरशतं । देशसंयतस्य चत्वारिंशतोऽष्टचत्वारिंशत् । प्रमत्तस्याप्रमत्तस्य च चत्वारिंशतश्चत्वारिंशत् । उभयश्रेण्यपूर्वकरणस्याष्टाविंशतेरष्टाविंशतिः । उभयश्रेण्यनिवृत्तिकरणस्य षष्टेर्द्वाषष्टिः । उभयश्रेणीसूक्ष्मसांपरायस्याष्टाविंशतेरष्टाविंशतिः । उपशांतकषायस्य चतुर्विंशतेश्चतुर्विंशतिः । क्षीणकषायस्याष्टानामष्टौ । सयोगकेवलिनश्चतुर्णां चत्वारः । अयोगिनः षण्णामष्टौ ॥ ३६४ ॥ अथ मिथ्यादृष्टावष्टादशस्थानानां प्रकृतिसंख्यामायुर्बंधाबंधविवक्षयाह—

१

	मि	सा	मि	अ	दे	प्र	अ	अ	अ	सू	उ	क्षी	स	अ
स्थानं	१८	४	८	४०	४०	४०	४०	२४।४	२४।३६	२४।४	२४	८	४	६
भंगः	५०	१२	३६	१२०	४८	४०	४०	२८	६२	२८	२४	८	४	८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—मिथ्यादृष्टिके अठारह स्थानकनिके पचास भंग हैं। सासादनके च्यारि स्थानकनिके बारह भंग हैं। मिश्रके आठ स्थानकानिके छत्तीस भंग हैं। असंयतके चालीस स्थानकनिके एकसौ वीस भंग हैं। देश संयतके चालीस स्थानकनिके अठतालीस भंग हैं। प्रमत्त अप्रमत्तके चालीस चालीस स्थानकनिके चालीस चालीस भंग हैं। दोऊ श्रेणीरूप अपूर्व करणके अठाईस स्थानकनिके अठाईस भंग हैं। दोऊ श्रेणीरूप अनिवृत्ति करणके साठि स्थानकनिके बासठि भंग है। दोऊ श्रेणीरूप सूक्ष्मसांपरायके अठाईस स्थानकनिके अठाईस भंग हैं। उपशांत कषायके चौवीस स्थानकनिके चौवीस भंग हैं। क्षीण कषायके आठ स्थानकनिके आठ भंग हैं। सयोगीके च्यारि स्थानकनिके च्यारि भंग हैं। अयोगीके छह स्थानकनिके आठ भंग हैं॥ ३६४॥ आगैं मिथ्यादृष्टिविषैं अठारह स्थानकनिविषैं प्रकृतिनिकी संख्या आयुका बंधकी वा अबंधकी विवक्षाकरि कहै हैं—

दुतिछस्सत्तट्ठणवेक्करसं सत्तरसमूणवीसमिगिवीसं।
हीणा सव्वे सत्ता मिच्छे बद्धाउगिदरमेगूणं॥३६५॥

द्वित्रिषट्सप्ताष्टनवैकादश सप्तदशोनविंशमेकविंशं।
हीना सर्वा सत्ता मिथ्ये बद्धायुष्कमितरदेकोनं॥ ३६५॥

जी० प्र०—बद्धायुष्के मिथ्यादृष्टौ द्वित्रिषट्सप्ताष्टनवैकादशसप्तदशैकान्नविंशत्येकविंशतिभिः पृथग्हीने सत्वे स्थानानि दश। अबद्धायुष्के पुनरेकैकस्मिन् हीने दश। एवं विंशतिस्थानेषु पुनरुक्तद्वयेऽपनीतेऽष्टादश भवंति॥ ३६५॥ ताः अपनीतप्रकृतीर्गाथाद्वयेनाह—

स० चं०—जाकैं आगामी आयुका बंध भया होइ ताकौं बद्धायु कहिए बहुरि जाकैं आगामी आयु बंध न भया होइ ताकौं अबद्धायु कहिए। तहां बद्धायु मिथ्यादृष्टिविषैं सर्व सत्वरूप एकसौ अठतालीस प्रकृतिनितैं दोय प्रकृति घाटि पहिला स्थान है बहुरि द्वितीयादिक स्थान अनुक्रमतैं तीन छह सात आठ नव ग्यारह सतरह उगणीस इकईस प्रकृति घाटि जानने। ए दश स्थान तौ बद्धायुके हैं। बहुरि अबद्धायुके बद्धायुके स्थाननितैं एक एक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधिक प्रकृति घाटि स्थान जानने। ऐसैं इन वीस स्थाननिविषैं पुनरुक्त दोय स्थानक घटाएं मिथ्यादृष्टिविषैं सर्व अठारह स्थान जानने ॥३६५॥ आगैं घटाई जे प्रकृति तिनके नाम कहैं हैं—

तिरियाउगदेवाउगमण्णदराउगदुगं तहा तित्थं।
देवतिरियाउसहियाहारचउक्कं तु छच्चेदे ॥३६६॥
आउदुगहारातित्थं सम्मं मिस्सं च तह य देवदुगं।
णारयछक्कं च तहा णराउउच्चं च मणुवदुगं ॥३६७॥ जुम्मं।

तिर्यगायुष्कदेवायुष्कमन्यतरायुष्कद्विकं तथा तीर्थं।
देवातिर्यगायुस्सहितमाहारचतुष्कं च षट् चैताः ॥ ३६६ ॥
आयुर्द्विकाहारतीर्थं सम्यं मिश्रं च तथा च देवद्विकं।
नारकषट्क च तथा नरायुरुच्चं च मानवद्विकं ॥ ३६७ ॥ युग्मं।

जी० प्र०—तिर्यग्देवायुषी अन्यतरायुषी तीर्थं चेति देवतिर्यगायुषी आहारकचतुष्कं चेति अन्यतरायुषी तीर्थमाहारचतुष्कं चेति, ता एव सप्त,

१	० २	० ३	० ६	० ७	० ८	० ९	० ११	० १७	० १९	० २१
मि। ब=	१४६	१४५	१४२	१४१	१४०	१३९	१३७	१३१	१२९	१२७
भंगः	१	५	१	५	५	५	१	१	१	१
मि। अ=	१४५	१४४	१४१	१४०	१३९	१३८	१३६	१३०	१२९	१२७
भंगः	१	४	१	४	४	४	४	२	पुनः	पुनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यक्त्वप्रकृत्याष्टौ, पुनर्मिश्रप्रकृत्या नव, देवद्विकेनैकादश, नारकषट्केन सप्तदश, नरायुरुच्चैर्गोत्राभ्यामेकान्नविंशतिः, मनुष्यद्विकेनैकविंशतिः, तेषामष्टादशस्थानानां पंचाशद्भंगाः रचनानुसारेण परमगुरूपदेशेनोच्यंते—

तत्र प्राग्बद्धनरकायुर्मनुष्यो मिथ्यादृष्टिर्गृहीतवेदकसम्यक्त्वोऽसंयतः केवलिद्वयोपांते षोडशभावनाभिस्तीर्थबंधं प्रारभ्य तत्सकर्मा भूत्वा मरणकाले भुज्यमानायुष्यंतर्मुहूर्तेऽवशिष्टे मिथ्यादृष्टिर्जातस्तस्य तिर्यग्देवायुरभावात्षट्चत्वारिंशच्छतं सत्वस्थानं भवति । अस्य तु भंगः बध्यमानतिर्यग्मनुष्यायुर्भुज्यमानमनुष्यायुरसंयतयोस्तीर्थबंधप्रारंभाभावात्, बध्यमानदेवायुर्मनुष्यासंयतादिचतुर्णां सम्यग्दर्शनप्रकृत्यभावात् । भुज्यमाननारकबध्यमानमनुष्यायुषोर्मिथ्यादृष्टिर्नास्ति कुतः ? षण्मासावशेषे संभवत्तीर्थसत्वस्य तदा गर्भावतरणकल्याणसद्भावात् मिथ्यादृष्टित्वाघटनाच्चैक एव । स एव जीवो नारको भूत्वा पर्याप्तिनिष्पत्त्यंतर्मुहूर्ते मिथ्यादृष्टिर्भूत्वा तिष्ठति तस्याबद्धायुष्कत्वाद्भुज्यमानायुष्यादितरेषामभावात्पंचचत्वारिंशच्छतं सत्त्वस्थानं भवति । तत्रापि भंग एक एव । संदृष्टिः—

ब	१४६ १
अ	१४५ १

पुनः द्वितीयं बध्यमानायुःस्थानं चतुर्गतिविवक्षितभुज्यमानबध्यमानायुर्द्वयाच्छेषायुर्द्वयतीर्थाभावात्पंचचत्वारिंशच्छतप्रकृतिकं । तत्र भंगाः भुज्यमाननारकबध्यमानतिर्यगायुः १ भुज्यमाननारकबध्यमानमनुष्यायुः २ भुज्यमानतिर्यग्बध्यमाननरकायुः ३ भुज्यमानतिर्यग्बध्यमानतिर्यगायुः ४ भुज्यमानतिर्यग्बध्यमानमनुष्यायुः ५ भुज्यमानतिर्यग्बध्यमानदेवायुः ६ भुज्यमानमनुष्यबध्यमाननारकायुः ७ भुज्यमानमनुष्यबध्यमानतिर्यगायुः ८ भुज्यमानमनुष्यबध्यमानमनुष्यायुः ९ भुज्यमानमनुष्यबध्यमानदेवायुः १० भुज्यमानदेवबध्यमानतिर्यगायुः ११ भुज्यमानदेवबध्यमानमनुष्यायुश्चेति १२ द्वादश भवंति ।

	१	१	०	०	१	१	०	०	०	१	०	०
बध्यमा.	ति	म	ना	ति	म	दे	ना	ति	म	दे	ति	म
भुज्यमा	ना	ना	ति	ति	ति	ति	म	म	म	म	दे	दे

एतेषु भुज्यमानबध्यमानतिर्यगायुर्भुज्यमानबध्यमानमनुष्यायुषोः पुनरुक्तत्वात् भुज्यमानतिर्यग्बध्यमाननरकायुः १—भुज्यमानमनुष्यबध्यमाननरकायुः ५२६
२—भुज्यमानमनुष्यबध्यमानतिर्यगायुः ३—भुज्यमानदेवबध्यमानतिर्यगायुः ४—भुज्यमानदेवबध्यमानमनुष्यायुषां समत्वाच्च शेषाः पंचैव ग्राह्याः । संदृष्टिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बध्य	ति	म	म	दे	दे
भुज्य	ना	ना	ति	ति	म

तदवध्यमानायुः स्थानं तदेकं बद्धायुर्विना चतुश्चत्वारिंशच्छतप्रकृतिकं । तस्य भंगाश्चतुर्गतिभुज्यमानायुर्भेदाच्चत्वारः । संदृष्टिः—

बध्य	१४५ ५
अब	१४४ ४

कश्चिन्मिथ्यादृष्टिः प्रागप्रमत्तगुणस्थानं गत्वाऽनुपार्जिताहारकचतुष्टयतया तदसत्त्वोऽथवा उपार्ज्य क्रमेण मिथ्यादृष्टिर्भूत्वोद्वेल्य तदसत्त्वः सन् मनुष्योबद्धनरकायुर्गृहीतवेदकसम्यक्त्वोऽसंयतः केवलिद्वयोपांते षोडशभावनाभिस्तीर्थकरयुग्यबंधं प्रारभ्य तत्सत्कर्मा भूत्वा मरणे भुज्यमानायुष्यंतर्मुहूर्तेऽवशिष्टे द्वितीयतृतीयपृथ्व्योर्गमिष्यमानमिथ्यादृष्टिः स्यात् तस्य तृतीयं बध्यमानायुःस्थानं तिर्यग्देवायुराहारकचतुष्काभावाद्द्वाचत्वारिंशच्छतकं भवति। तस्य भंग एक एव बद्धतिर्यग्मनुष्यायुष्कयोस्तीर्थसत्त्वाभावात् । बद्धदेवायुष्के तत्सत्वेऽपि सम्यक्त्वप्रकृत्यभावाच्च। तर्हि मनुष्य एव तत्प्रारंभे, देवनारकासंयतेऽपि तद्बंधः कथं ? सम्यक्त्वाप्रच्युतावुत्कृष्टतन्निरंतरबंधकालस्यांतर्मुहूर्ताधिकाष्टवर्षन्यूनपूर्वकोटिद्वयाधिकत्रयस्त्रिंशत्सागरोपममात्रत्वेन तत्रापि संभवात् । तदबद्धायुःस्थानं मनुष्यायूरहितमिति तिर्यग्मनुष्यदेवायुराहारकचतुष्काभावादेकचत्वारिंशच्छतकं । तस्य द्वितीयतृतीयपृथ्व्यपर्याप्तनारकमिथ्यादृष्टेरेव संभवाद् भंग एकः । संदृष्टिः—

ब	१४२ १
अ	१४१ १

चतुर्थं बध्यमानायुःस्थानं विवक्षितभुज्यमानबध्यमानायुर्भ्यामितरायुर्द्वयाहारचतुष्कतीर्थाभावादेकचत्वारिंशच्छतकं । तत्र प्रागुक्तद्वादशभंगेषु पुनरुक्तसमभंगान्विहाय पंच भंगा भवंति । तदबद्धायुःस्थानं इतरायुस्त्रयाहारकचतुष्कतीर्थाभावाच्चत्वारिंशच्छतकं । तत्र चातुर्गतिकभेदाद् भंगाश्चत्वारः । संदृष्टिः—

बारहकषायनिके स्पर्धक तौ सर्वघाती ही हैं देशघाती नाही हैं अर संज्वलनके स्पर्धक सर्वघाती वा देश घाती दोऊ हैं। तातैं अनंतानुबंधी क्रोध मान माया लोभविषैं एकका उदय होत संतैं अप्रत्याख्यानादिक तीनोंका भी उदय है ही जातैं अनंतानुबंधीका उदय सहित औरनिका उदयकैं भी सम्यक्त्व संयम गुणका घातकपणा है। बहुरि तैसैं ही अप्रत्याख्यान क्रोधादिकविषैं एकका उदय होतैं प्रत्याख्यानादिक दोयका भी उदय है ही जातैं अप्रत्याख्यानका उदयकी साथि तिन दोऊनिका उदय भी देश संयमकौं घातै है। बहुरि प्रत्याख्यान क्रोधादिकविषैं एकका उदय होतैं संज्वलनका भी उदय है ही जातैं प्रत्याख्यानवत् संज्वलन भी सकल संयमकौं घातै है बहुरि केवल संज्वलनकौं उदय होतैं प्रत्याख्यानादिक तीनका उदय नाहीं हो है जातैं और कषायनिके स्पर्धक सकल संयमके विरोधी हैं। बहुरि केवल प्रत्याख्यान संज्वलनका भी उदय होतैं शेष दो कषायनिका उदय नाहीं है जातैं अवशेष कषायनिके स्पर्धक देश सकल संयमकौं घातैं हैं। बहुरि केवल अप्रत्याख्यानादिक तीनका उदय होतैं अनंतानुबंधीका उदय नाही है जातैं अनंतानुबंधीके स्पर्धक सम्यक्त्व देशसंयम सकल संयमकौं घातै हैं। या प्रकार अनंतानुबंधीनिके अर तिसके उदयकी साथि अप्रत्याख्यानादिकनिकैं चारित्रमोहपणांकौं होत संतैं भी सम्यक्त्व संयमका घातकपणा कह्या। बहुरि अनंतानुबंधीका उदयरहित अप्रत्याख्यानादिनिके उदय हैं ते देशसंयमकौं घातैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है। बहुरि अप्रत्याख्यानका उदयरहित प्रत्याख्यान संज्वलनका उदय है सो सकल संयमकौं घातै है बहुरि प्रत्याख्यानका उदय रहित केवल संज्वलन देशघातियानिका उदय यथाख्यातकौं घातै है ऐसैं शक्ति साधारण विवक्षा करि सोलह कषायनिके क्रोधादिक भेदकरि च्यारि कषाय ही अंगीकार कीए हैं तीह कारणकरि सम्यक्त्व देश संयम सकल संयमनिका असंयत देशसंयत प्रमत्तादिकविषैं उपजना कह्या है। इहां प्रश्न—जो अनंतानुबंधीकी शक्तिकरि और कषायनिकी शक्ति कैसैं समान हो है? ताका उत्तर—

आवरणदेसघादंतरायसंजलणपुरिससत्तरसं।
चउविह भावपरिणदा तिविहा भावा हु सेसाणं ॥ १ ॥

देशघाती च्यारि ज्ञानावरण तीन दर्शनावरण अर पंच अंतराय च्यारि संज्वलन पुरुषवेद ए सतरह प्रकृति तो च्यारि प्रकारकरि अनुभागरूप परिणमै हैं बहुरि अवशेष मिश्र मोहनी विना केवलज्ञानावरणादिक सर्व घातिया वीस नोकषाय आठ अघातिया पिचहत्तरि ए तीनप्रकार अनुभागरूप परणमै हैं सो अनुभाग बंधका कथनविषै पूर्वै कथन कीया है तातैं अनुभाग शक्तिके विशेषतैं अनंतानुबंधीवत् अन्यकषायनिकैं भी सम्यक्त्वादिकका घातके करनेतैं सादृश्यपना संभवै है सो मिथ्यात्व सहित उदय होंय कषाय ते सम्यक्त्वकौं घातै हैं। अनंतानुबंधी सहित उदय होंइ कषाय ते सम्यक्त्व संयमकौं घातैं हैं। अप्रत्याख्यान सहित उदय होंइ ते देशसंयम सकल संयमकौं घातैं है, प्रत्याख्यान सहित उदय होंइ ते सकल संयमकौं घातैं हैं। संज्वलनके देशघाती स्पर्धकनिका उदय है सो यथाख्यातकौं घातै है ऐसैं बारह कषाय अर सर्वघाती संज्वलन स्पर्धकनिविषैं कोई प्रकारकरि भेद है तथापि शक्तिकी समानतातैं समान कार्यकौं करै है तातैं इहां अनंतानुबंधी आदि भेद न कहे। क्रोधादिक च्यारि कषाय ही कहे। तहां क्रोधविषैं नामकर्मके बंधस्थान नारकविषैं तो गुणतीस तीसके दोय, तिर्यंचगतिविषैं आदिके छह, मनुष्यनिविषैं सर्व, देवविषैं देवगतिवत् च्यारि हैं ऐसैं ही मान माया लोभविषैं भी जानने। बहुरि ज्ञानमार्गणाविषैं तीन कुज्ञाननिविषैं आदिके छह तहां नारकीनिकैं ज्ञाननिविषैं तो तिर्यंचगति मनुष्यगति पर्याप्त सहित गुणतीस अर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उद्योत सहित तीसके दोय हैं। अर एकेंद्री विकलेंद्रीकौं कुमति कुश्रुतविषैं नरकगति देवगति संयुक्त अठाईसका विना योग्य तिर्यंच मनुष्ययुत तेईसकानै आदि देकरि पंच हैं। बहुरि पंचेंद्री तिर्यंच मनुष्य अपर्याप्तका कुमति कुश्रुत सहित मिथ्यादृष्टिविषैं भी तेई पांच हैं। बहुरि कुज्ञान तीन सहित मिथ्यादृष्टि सासादनवर्ती पर्याप्त पंचेंद्री तिर्यंच मनुष्यविषै यथायोग्य चतुर्गतियुत छह स्थान हैं। बहुरि भवनत्रिक सौधर्मद्विक विषै तिर्यंच गति सहित यथायोग्य पचीस छवीस गुणतीस तीसके अर मनुष्यगतियुत गुणतीसका ए पांच हैं। बहुरि सनत्कुमारादि सहस्रारपर्यंतविषैं संज्ञी पंचेंद्री पर्याप्त तिर्यंच मनुष्यगति सहित गुणतीसका अर उद्योतसहित तीस का ये दोय हैं बहुरि आनतादि नवग्रैवेयक पर्यंतविषै मनुष्यगति सहित गुणतीसका ही है जातैं 'तदो णत्थि सदर चऊ' इस वचनतैं तहां तिर्यग्गति युत स्थानका अभाव है। ऐसैं कुज्ञानवाले जीवनिकी अपेक्षा तीन कुज्ञाननिविषैं छह स्थान कहे हैं॥ ५४६॥

सण्णाणे चरिमपणं केवलजहखादसंजमे सुण्णं।
सुदमिव संजमतिदए परिहारे णत्थि चरिमपदं॥ ५४७॥

सज्ज्ञाने चरमपंच केवलयथाख्यातसंयमे शून्यं।
श्रुतमिव संयमत्रितये परिहारे नास्ति चरमपदं॥ ५४७॥

जी० प्र०—मतिश्रुतावधिमनःपर्ययज्ञानेष्वष्टाविंशतिकादीनि पंच त्रयोविंशतिकपंचविंशतिषड्विंशतिकाभावात्, मतिज्ञानादित्रयं पर्याप्तापर्याप्तनारकसंज्ञितिर्यग्मनुष्यदेवेषु। तत्र नारके मनुष्यगतियुतनवविंशतिकमाद्यपृथ्वीत्रये तु मनुष्यगतितीर्थयुतत्रिंशत्कमपि, सौधर्मादिदेवे ते एव द्वे, भवनत्रये मनुष्यगतियुतनवविंशतिकमेव, तिरश्चि देवगतियुताष्टाविंशतिकं, मनुष्ये तच्च देवगतितीर्थयुतनवविंशतिकंच। चतुर्ज्ञानप्रमत्ते ते द्वे, तदप्रमत्तापूर्वकरणषष्ठभागांते तद्द्वयं च, देवगत्याहारकद्वययुतत्रिंशत्कदेवगतितीर्थाहारयुतैकत्रिंशत्के च तत्सप्तमभागादिसूक्ष्मसांपरायांते यशस्कीर्तिरूपैकं। केवलज्ञाने नामबंधशून्यं। सामायिकादिसंयमत्रये श्रुतमिव पंच स्थानानि। तत्र परिहारविशुद्धौ न चरमपदं नैककं स्थानमस्ति। तत्र सम्-एकीभावेन अयः-गमनं समयः, समय एव सामायिकं। समयः प्रयोजनमस्येति वा सामायिकं। एतावति क्षेत्रे काले च नियमिते सति स्थितस्य मुनेर्महाव्रतं स्यात्, न केवलं ७१३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृतस्थूलसूक्ष्मजीवहिंसादिनिवृत्तेः तस्यास्तद्वात्युदयेऽर्हद्गृहीतलिंगवन्मिथ्यादृष्टावपि संभवात् राजकुलसर्वगतचैत्रस्य राजाभिधानवत्तस्योपचारेणैव तदभिधानात् । तत एव देशकालयोरियत्तापरिच्छिन्नस्यैकत्ववृत्तिरेव सामायिकं सिद्धं । 'प्रमादयोगैः प्राणव्यपरोपणं हिंसा' तन्निवृत्तिरहिंसा महाव्रतं । अनृतस्तेयाब्रह्मपरिग्रहनिवृत्तयः सत्यादिमहाव्रतानि । सम्यगीर्याभाषैषणादाननिक्षेपणोत्सर्गाः पंच समितयः । सम्यग्योगनिग्रहास्तिस्रो गुप्तयः । कायवाङ्मनोव्यापारा योगाः । तेषां स्वेच्छाप्रवृत्तिनिवृत्तयः निग्रहास्ते च विषयसुखाभिलाषानुवृत्तिनिषेधार्थंजाताः सम्यगित्युच्यंते । सत्यादयोऽहिंसाव्रतपरिपालनसम्यगुपायाः । ते चामी त्रयोदश सर्वसावद्याद्विरतोऽस्मीति स्वीकृतसामायिकेंऽतर्भवंति । तत एव श्रीवर्धमानस्वामिना प्राक्तनोत्तमसंहननजिनकल्पाचरणपरिणतेषु तदेकधा चरित्रं । पंचमकालस्थविरकल्पाल्पसंहननसंयमिषु त्रयोदशधोक्तं । तन्नियतक्षेत्रद्विधाकालप्रमादकृतानर्थप्रबंधविलोपने सम्यक्प्रतिक्रियाविकल्पनिवृत्तिर्वा छेदोपस्थापनं । परिहरणं परिहारः प्राणिवधनिवृत्तिरित्यर्थः । तेन विशिष्टा शुद्धिर्यस्मिन्स परिहारविशुद्धिः । सूक्ष्मः सांपरायः कषायो यस्मिन् स सूक्ष्मसांपरायः । मोहनीयस्य निरवशेषोपशमात् क्षयाद्वात्मस्वभावावस्थोपेक्षालक्षणः यथाख्यातः । पूर्वचारित्रानुष्ठायिभिर्मोहक्षयोपशमाभ्यां प्राप्त यथाख्यातं न तथाख्यातं यथाशब्दस्यानंतर्यार्थवृत्तित्वान्निरवशेषमोहक्षयोपशमानंतरमाविर्भवतीत्यर्थः । तथाख्यातमिति वा यथात्मस्वभावोऽवस्थितस्तथैवाख्यातत्वात् । तत्राद्यसंयमद्वये प्रमत्ते देवगतियुताष्टाविंशतिकदेवगतितीर्थयुतनवविंशतिके द्वे । अप्रमत्तापूर्वकरणषष्ठभागांते तद्द्वयं च देवगत्याहारकद्विकद्वययुतत्रिंशत्कदेवगतितीर्थाहारयुतैकत्रिंशत्के च सप्तमभागेऽनिवृत्तिकरणे चैककं । परिहारविशुद्धौ प्रमत्ताप्रमत्तयोः सामायिकोक्तानि द्वे चत्वारि, नात्र श्रेण्यारोहणाभावादेकैकमस्ति ॥ ५४७ ॥

स॰ चं॰—मति श्रुत अवधि मनःपर्यय ज्ञाननिविषैं अठाईसकेतैं लगाय पांच स्थान पाइए हैं । जातैं इहां तेईसकानैं आदि देकरि तीनका अभाव है । तहां मतिज्ञानादिक तीन हैं ते पर्याप्त अपर्याप्त नारकी अर संज्ञी तिर्यंच अर मनुष्य देव इनविषैं पाइए । तहां नारकीनिविषैं मनुष्यगतियुक्त गुणतीसका वा आदि तीन पृथ्वीविषैं मनुष्यगति तीर्थंकर सहित तीसका ए दोय स्थान हैं । सौधर्मादिक देवनिविषैं भी तेई दोन्यों स्थान हैं । भवनत्रिकविषैं मनुष्यगति युक्त गुणतीसहीका है । बहुरि तिर्यंचविषैं देवगति सहित अठाईसहीका है । मनुष्यविषैं देवगति सहित अठाईस वा देवगति तीर्थंकर सहित गुणतीसका है ऐसैं मतिज्ञानादिक तीनविषैं कहे । मनःपर्यय सहित च्यारि ज्ञाननिविषैं प्रमत्तविषैं अठाईस गुणतीसके दोय स्थान हैं । बहुरि अप्रमत्त अपूर्वकरणका षष्ठम भाग पर्यंत ते दोऊ अर देवगति आहारक द्विकयुक्त तीसका अर देवगति तीर्थंकर आहारकयुक्त इकतीसका ऐसैं च्यारि हैं अर अपूर्वकरणके सातवे भागतैं सूक्ष्मसांपराय पर्यंत यशस्कीर्तिरूप एक ऐसैं पंच स्थान हैं । बहुरि केवलज्ञानविषैं नामकर्मका बंधका अभाव है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि सामायिकादिक तीन संयमनिविषैं श्रुतज्ञानवत् पांच स्थान हैं। तहां परिहार विशुद्धिविषै अंतका एक स्थान नाहीं है तातैं च्यारि ही हैं। तहां सं कहिए एकीभावकरि सम भावविषैं अय कहिए गमन परिणमन सो समय कहिए। समय सोही सामायिक अथवा समय है प्रयोजन जाका सो सामायिक कहिए। एतावन्मात्र क्षेत्रकालका नियम होतैं तिष्ठ्या जो मुनि ताकैं महाव्रत हो है। केवल स्थूल सूक्ष्म जीवहिंसादिकका त्याग कीएं ही महाव्रत न हो है जातैं ऐसी क्रिया तौ चारित्र मोहका उदय होतैं अर्हंत लिंगका धारी मिथ्यादृष्टिविषैं भी संभवै है जैसैं राजकुलविषैं प्राप्त राजमान्य जनकौं राजा कहिए तैसैं तिस क्रियाकौं उपचारतैं महाव्रत कहिए है तातैं देशकालका तावत् जितना योग्य तितना प्रमाणकरि एकत्वरूप वृत्ति सोई सामायिक है यहु सिद्धि भया। तहां प्रमाद योगनिकरि प्राणनिका हिंसन सो हिंसा याका त्याग सो अहिंसा महाव्रत अर अनृत स्तेय अब्रह्म परिग्रहका त्याग ते सत्यादिक महाव्रत हैं। बहुरि सम्यक् इर्या भाषा एषणा आदाननिक्षेपण उत्सर्ग ए पांच समिति हैं। बहुरि सम्यक् योगनिका निग्रह ते तीन गुप्ति हैं। काय वचन मनका व्यापाररूप योग तिनकी स्वेच्छा प्रवृत्तिका त्याग सोई निग्रह कहिए। ते गुप्ति विषय सुखका अभिलाष निमित्त प्रवृत्तिका निषेधके अर्थि भई हैं तातैं सम्यक् कहिए सो ए सत्यादिक सर्व अहिंसा व्रतके पालनेके अर्थि भले उपाय हैं तातैं ए तेरह भेद हैं ते सर्व सावद्यतैं मैं त्यागी हूं ऐसैं अंगीकार कीया सामायिक तिसविषैं गर्भित हैं। ताहीतैं श्रीवर्धमान स्वामीकरि पूर्वले उत्तम संहननके धारी जिनकल्प आचरणरूप परिणए मुनि तिनकैं सो सामायिकरूप एक प्रकार ही चारित्र कह्या है। बहुरि पंचमकालविषैं स्थविरकल्पी हीन संहननके धारी तिनकौं सो चारित्र तेरह प्रकार कह्या है। बहुरि नियत क्षेत्र वा नियत अनियतकालविषैं प्रमादतैं अनर्थ दोषकरि सामायिकविषैं विलोपभएं सम्यक् प्रतिक्रिया ताके शुद्ध करनेका उपाय वा विकल्प जे भेद ताका त्याग सो छेदोपस्थापन कहिए। बहुरि परिहार कहिए प्राणहिंसाका त्याग तिहिंकरि विशेषतारूप शुद्धता जिसविषैं होइ सो परिहारविशुद्धि कहिए। बहुरि सूक्ष्म है सांपराय कहिए कषाय जिसविषैं सो सूक्ष्मसांपराय कहिए।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि मोहनीयका समस्त उपशमतैं वा क्षयतैं आत्मस्वभावविषैं अवस्थितिरूप उपेक्षा उदासीनता है लक्षण जाका सो यथाख्यात है। पूर्वैं चारित्रके धारीनिकरि मोहका क्षय वा उपशमकरि पाया सो यथाख्यात कहिए। यथा शब्द अनंतर वाची है सो समस्त मोहका क्षय वा उपशमके अनंतरि प्रगट हुआ सो यथाख्यात है अथवा तथाख्यात भी याकौं कहिए जातैं जैसा आत्मस्वभाव अवस्थित था तैसाही प्रगट हूवा सो इनविषैं सामायिक छेदोपस्थापनविषै तौ प्रमत्तविषैं देवगति युक्त अठाईसका देवगति तीर्थंकर सहित गुणतीसका ए दोय हैं। अप्रमत्त अपूर्वकरणका षष्ठम भागपर्यंत दोय तो तेई अर देवगति आहारक युत तीस अर तीर्थंकर आहारक सहित इकतीसके च्यारि हैं। बहुरि अपूर्वकरणका सातवां भाग अर अनिवृत्तिकरणविषैं एकका है ऐसैं पांच बंधस्थान हैं। बहुरि परिहारविशुद्धिविषैं सामायिकवत् प्रमत्तविषैं दोय अप्रमत्तविषैं च्यारि हैं इहां श्रेणी चढनेके अभावतैं एकका स्थान नाहीं है ॥ ५४७ ॥

अतिमठाणं सुहुमे देसाविरदीसु हारकम्मं वा।
चक्खूजुगले सव्वं सगसगणाणं व ओहिदुगे ॥ ५४८ ॥

अंतिमस्थानं सूक्ष्मे देशाविरत्योः आहारकर्म वा।
चक्षुर्युगले सर्वं स्वकस्वकज्ञानं वा अवधिद्विके ॥ ५४८ ॥

जी० प्र०—सूक्ष्मसांपरायसंयमे अंतिमस्थानं बध्यते। यथाख्याते केवलज्ञानवन्नामबंधशून्यं। देशविरते आहारकवद्देवगतियुताष्टाविंशतिकदेवगतितीर्थयुतनवत्रिंशतिके द्वे। तत्त्विरश्चि देवगतियुताष्टाविंशतिकमेव। अविरतौ कार्मणवदाद्यानि षट्। अत्र नारके मिथ्यादृष्टौ सासादने च पंचेंद्रियपर्याप्ततिर्यग्गतियुतमनुष्यगतियुतनवविंशतिकोद्योतयुतत्रिंशत्के द्वे। मिश्रे मनुष्यगतियुतनवविंशतिकमेव। असंयते धर्मादित्रये तच्च मनुष्यगतितीर्थयुतत्रिंशत्कं च। शेषपृथ्वीषु मनुष्यगतियुतनवविंशतिकमेव। तिर्यग्गतौ मिथ्यादृष्टौ त्रयोविंशतिकादीनि षट्। तत्र पर्याप्तापर्याप्तसर्वैकविकलेंद्रियेष्वपर्याप्तपंचेंद्रिये च न च नरकगतिदेवगतियुताष्टाविंशतिकं 'पुण्णादरं विगिविगले' इति तेषु तदबंधात्। नापि बादरसूक्ष्मपर्याप्तापर्याप्ततेजोवायुषु मनुष्यगत्यपर्याप्तयुतपंचविंशतिकपर्याप्तमनुष्यगतियुतनवविंशतिके 'मणुवदुगं मणुवाऊ उच्चं णहि तेउ वाउम्मीति तेषु तद्बंधनिषेधात्। प्रथमोपशमसम्यक्त्वं त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्युतदेशव्रतं वा विराध्य जातसासादनस्तिर्यङ् तिर्यग्गतियुतमनुष्यगतियुतनवविंशतिकोद्योतयुतत्रिंशत्कदेवगतियुताष्टाविंशतिकानि बध्नाति । मरणो नरकवर्जितगतिषूत्कृष्टेन समयोनषडावलिकालं जघन्येनैकसमयं सासादनस्तिर्यङ् तदा 'णहि सासणो अपुण्णो साहारणसुहुमगे य तेउदुगे' इति शेषैकेंद्रियविकलत्रयसंज्ञ्यसंज्ञ्येव नरकगतिदेवगतियुताष्टाविंशतिकमबध्नन् शरीरपर्याप्तेः प्राक् सासादनत्वं त्यक्त्वा नियमेन मिथ्यादृष्टिर्भूत्वा पर्याप्तेरुपरि बध्नाति। संज्ञ्यसंज्ञिनावपि तत्कथं न बध्नतः? 'मिच्छदुगे देवचऊ तित्थं णहीति अस्मिन् सासादने तयोरपि तदघटनात् । तिर्यग्मिश्रोऽसंयतो वा संज्ञिपर्याप्त एव तन्मिश्रे देवगतियुताष्टाविंशतिकमेव 'उवरिमछण्हं च छिदी सासणसम्मे' इति तिर्यग्मनुष्यगत्योरस्य बंधाभावात् । तदसंयतेऽपि तदेव तिर्यग्जीवे तीर्थाहाराणामबंधात् । मनुष्ये मिथ्यादृष्टौ लब्ध्यपर्याप्ते नरकगतिदेवगतियुताष्टाविंशतिकवर्जिततिर्यग्मनुष्यगतियुतत्रयोविंशतिकादीनि षट् । पर्याप्ते चतुर्गतियुतानि तानि षट्, चदुगदिमिच्छो सण्णीत्यादिसामग्रीसंपन्नः करणलब्धिचरमसमये दर्शनमोहमुपशमय्य प्रथमोपशमसम्यक्त्वं तत्सहितदेशव्रतं तत्सहितमहाव्रतं वा प्राप्य तत्कालांतर्मुहूर्ते एकसमयतः षडावल्यंतेषु कालेष्वेकस्मिन्नवशिष्टेऽनंतानुबंधिनामप्रशस्तोपशांतानामन्यतमोदयेन लब्धगुणं हत्वा जातसासादनः एकविकलेंद्रियाणां मिथ्यादृष्टावेव बंधात् पंचेंद्रियपर्याप्ततिर्यग्मनुष्यगतियुतनवविंशतिकोद्योतयुतत्रिंशत्कदेवगतियुताष्टाविंशतिकानि बध्नाति । मरणो तिर्यङ् मनुष्यो देवो वा सासादनकाले नवविंशतिकादिद्वयं, न च नरकगतिदेवगत्यष्टाविंशतिकं । तत्काले परिसमाप्ते मिथ्यादृष्टिर्भूत्वा शेषमिश्रकाले विनाष्टाविंशतिकं पंचविंशतिकादीनि पंच । पर्याप्तौ तु अष्टाविंशतिकमपि । कर्मभोगभूमिमिश्रासंयतौ देवगत्यष्टाविंशतिकमेव नरकतिर्यग्गत्योः सासादने बंधच्छेदात् । विग्रहगतितीर्थकृत् मिश्रतीर्थकृत् गर्भतीर्थकृत् जन्मतीर्थकृत् कुमारतीर्थकृत् वद्धदेवनरकायुः प्रारब्धतद्बंधः तत्सच्चचरमांगश्च देवगतितीर्थयुतनवविंशतिकं, देवः पर्याप्तो मिथ्यादृष्टिः भवनत्रयसौधर्मद्वयजः एकेंद्रियपर्याप्ततिर्यग्गतियुतपंचविंशतिकातपोद्योतयुतषड्विंशतिकपंचेंद्रियपर्याप्ततिर्यग्मनुष्यगतियुतनवविंशतिकतिर्यग्गत्युद्योतयुतत्रिंशत्कानि, सानत्कुमारादिदशकल्पजः मनुष्यतिर्यग्गतियुतनवविंशतिकतिर्यग्गत्युद्योतयुतत्रिंशत्के । आनतादिकल्पनवग्रैवेयकजः मनुष्यगतियुतनवविंशतिकमेव । मनुष्यलोकप्रतिबद्धत्रिंशद्भोगभूमितिर्यग्मनुष्यः मानुषोत्तरात्स्वयंप्रभाचलांतरालवर्तिजघन्यतिर्यग्भोगभूमिसंज्ञितिर्यङ्षण्णवतिकुमानुष्यद्वीपकुमानुष्यश्च नियमेन देवायुष्यं स्वस्थितिनवमासावशेषेऽष्टापकर्षेषु कश्चित्त्रिभागावशेषे वद्ध्वा भुज्यमानायुः स्थितिक्षयवशेन भवनत्रये कल्पस्त्रीषु वा मिथ्यादृष्टिर्भूत्वोत्पद्य यावच्छरीरमपूर्णं तावत् निर्वृत्त्यपर्याप्तो भवति । अत्र प्रस्तुतगाथा—

सव्वहोत्ति सुद्दिट्ठी महव्वई भोगभूमिजा सम्मा । सोहम्मदुगं मिच्छा भवणतियं तावसा य वरं ॥ १ ॥

मिथ्यादृष्टयो भोगभूमिजास्तापसाश्च वरमुत्कृष्टेन भवनत्रये उत्पद्यंते नान्यत्र । भरतैरावतविदेहजाः स्वयंभूरमणद्वीपापरार्धतत्समुद्रलवणोदकालोदजाश्च केचित् जलस्थलखचरसंज्ञिपर्याप्तभद्रमिथ्यादृष्टयः उपशमब्रह्मचर्यांकितवानप्रस्थाः एकजटित्रिशतजटिसहस्रजटिनग्नांडकांजीभिक्षुकंदमूलपत्रपुष्पफलभुजः अकामनिर्जरा एकदंडित्रिदंडिमिथ्यातपश्चरणपरिणताश्च कायक्लेशाचरणैः केचित् स्वस्वविशुद्ध्यनुसारेण भवनत्रयाद्यच्युतांतमुत्पद्यंते । अकामैः अनभिलषितैः बंधनेन क्षुत्पिपासानिरोधब्रह्मचर्यभूशयनमलधारणपरितापादिभिर्निर्जरा अकामनिर्जरेत्युच्यते । मिथ्यादर्शनोपेताः अनुपायकायक्लेशप्रचुराः निकृतिबहुलव्रतधराः बालतपसः । तदुत्पत्तिप्रस्तुतगाथासूत्रं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरया य परिव्वाजा बम्होत्तरच्चुदपदोत्ति आजीवा । अणुदिसअणुत्तरादो चुदा ण केसवपदं जंति ॥ १ ॥

चरकाः नग्नांडाः परिव्राजकाः एकत्रिदंडिनः एते उत्कृष्टेन भवनत्रयादिब्रह्मकल्पांतमुत्पद्यंते । आजीवाः कांजीभिक्षवः उत्कृष्टेन भवनत्रयाद्यच्युतांतमुत्पद्यंते । अनुदिशानुत्तरविमानागताः द्विचरमांगत्वात् वासुदेवप्रतिवासुदेवेषु नरकगामिषु नोत्पद्यंते । साग्रनाग्रभव्यमिथ्यादृष्टयः अर्हल्लिंगधराः बाह्यषड्विधतपोनिरतास्त्रिकालदेववंदनादिसमेताः दर्शनचारित्रमोहघातिकर्मोदयाः उपशमब्रह्मचर्यादिसमेताः केचिद् द्रव्यमहाव्रताः उपरिमग्रैवेयकांतमुत्पद्यंते न तत उपरि । अत्रोपयोगिगाथा सूत्रं—

णरतिरियदेसअयदा उक्कस्सेणच्चुदोत्ति णिग्गंथा । णरअयददेसमिच्छा गेवज्जंतोत्ति गच्छंति ॥ १ ॥

तिर्यग्मनुष्या देशसंयता असंयताश्चोत्कृष्टेनाच्युतांतमुत्पद्यंते । द्रव्यतो जिनरूपमहाव्रताः भावतोऽसंयतदेशसंयतमिथ्यादृष्टयः उपरिमग्रैवेयकांतमुत्पद्यंते । सोऽयं निर्वृत्त्यपर्याप्तमिथ्यादृष्टिः भवनत्रयकल्पस्त्रीसौधर्मद्वयजः तदा एकेंद्रियपर्याप्तयुतपंचविंशतिकातपोद्योतयुतपर्याप्ततिर्यग्गत्येकेंद्रिययुतषड्विंशतिकपंचेंद्रियपर्याप्ततिर्यग्गतियुतमनुष्यगतियुतनवविंशतिकोद्योतयुतत्रिंशत्कानि बध्नाति । सानत्कुमारादिदशकल्पजस्तदा पंचेंद्रियपर्याप्ततिर्यग्गतियुतमनुष्यगतियुतनवविंशतिकोद्योतयुततिर्यक्पंचेंद्रिययुतत्रिंशत्के एव, आईसाणोत्ति सत्तवामछिदीत्येकेंद्रियपर्याप्तादियुतस्थानानामबंधात् । आनताद्युपरिमग्रैवेयकांतजस्तदा मनुष्यगतियुतनवविंशतिकमेव । तिरियदुगं तिरियाऊ उज्जोओ णत्थीति तिर्यग्गतियुतनवविंशतिकत्रिंशत्कयोरबंधात् । एवं संक्षेपाद् देवगत्यसंयमिमिथ्यादृष्टीनां नामबंधस्थानानि योजितानि । अत्र जीवसमासपर्याप्तिभाषादिविवक्षया ग्रंथगौरवभयान्न योजितानि परमागमप्रवीणैर्योजयितव्यानि ।

अथ संज्ञिपर्याप्तो गर्भजो विशुद्धः साकारोपयोगो मिथ्यादृष्टिः तिर्यग्भोगभूमिजस्तदा जातिस्मरणाद्देवप्रतिबोधनाद्वा त्रिंशद्भोगभूमिजस्तदा तद्द्वयाच्चारणप्रतिबोधनाद्वा प्रथमोपशमसम्यक्त्वं गृहीत्वा संयतः स्यात् । स्वयंप्रभाचलबाह्यकर्मभूमिजस्तदा तद्द्वयात्तथा स्यात् । कश्चिच्च प्रथमोपशमसम्यक्त्वेन समं देशव्रतं गृहीत्वा देशसंयतः स्यात् । पंचदशकर्मभूमिजस्तदा जातिस्मरणाद्देवमनुष्यप्रतिबोधनाज्जिनबिंबदर्शनाद्वा तथा द्विविधः स्यात् । तादृक्मनुष्यस्तदा तथा द्विविधः, कश्चित्प्रथमोपशमसम्यक्त्वेन समं महाव्रतं स्वीकृत्याऽप्रमत्तोऽपि स्यात् । अयमप्रमत्तः कश्चित्प्रमत्तः स्यात् । कश्चिच्च द्वितीयोपशमसम्यक्त्वं स्वीकृत्य श्रेणिमारुह्य क्रमेणावतरन्नसंयतः देशसंयतः प्रमत्तो वा स्यात् । अमी प्रथमद्वितीयोपशमसम्यग्दृष्टयः स्वभवचरमे स्वसम्यक्त्वकाले जघन्येनैकसमये उत्कृष्टेन षडावलिमात्रेऽवशिष्टेऽनंतानुबंध्यन्यतमोदयेन सासादना भूत्वा प्राग्बद्धदेवायुष्का मृत्वा अबद्धायुष्काः केचिद्देवायुर्बध्वा च देवनिर्वृत्त्यपर्याप्तसासादनाः स्युः । ते च भवनत्रयकल्पस्त्रीसौधर्मद्वयजास्तदा पंचेंद्रियतिर्यग्मनुष्यगतिपर्याप्तयुतनवविंशतिकतिर्यग्गत्युद्योतपर्याप्तयुतत्रिंशत्के बध्नंति । सासादनकालमतीत्य मिथ्यादृष्टय एव भूत्वा तद्द्वयं यावच्छरीरमपूर्णं तावदेकेंद्रियपर्याप्तयुतपंचविंशतिकोद्योतातपैकेंद्रियपर्याप्तयुतषड्विंशतिके च सानत्कुमारादिदशकल्पजास्तदा तद्द्वयमेव आनतादिकल्पनवग्रैवेयकजास्तदा मनुष्यगतिनवविंशतिकमेव । सासादनत्वेऽतीते तन्निर्वृत्त्यपर्याप्तमिथ्यादृष्टिवद्बध्नंति । भवनत्रयाद्युपरिमग्रैवेयकांतमिश्ररुचयः पर्याप्तभवनत्रयकल्पस्त्र्यसंयताश्च मनुष्यगतियुतनवविंशतिकं वैमानिकास्तीर्थरहितास्तदेव सतीर्थाः मनुष्यगतितीर्थयुतत्रिंशत्कमेव ।

चक्षुर्दर्शनेऽचक्षुर्दर्शने च सर्वाणि । तत्र चक्षुर्दर्शने नारकाः नवविंशतिकत्रिंशत्के द्वे । चतुरिंद्रिया विनाष्टाविंशतिकं तिर्यग्गतिमनुष्यगतियुतत्र-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योविंशतिकादीनि षट्। पंचेंद्रियाः त्रयोविंशतिकादीनि षट्। मनुष्याः सर्वाणि। देवा यथायोग्यपंचविंशतिकषड्विंशतिकनवविंशतिकत्रिंशत्कानि। अचक्षुर्दर्शने नारका चक्षुर्दर्शनोक्ते द्वे। एकेंद्रियादिचतुरिंद्रियांताः नरकदेवगत्यष्टाविंशतिकं विना योग्यत्रयोविंशतिकादीनि षट्। पंचेंद्रियास्तद्युतानि षट्। मनुष्याः सर्वाणि। देवाः चक्षुर्दर्शनोक्तानि चत्वारि। अवधिदर्शनेऽवधिज्ञानवच्चरमाणि पंच। असंयतदेवनारके असंयतदेशसंयतसंज्ञिपर्याप्ततिरश्च्यसंयतादिक्षीणकषायांतमनुष्ये च देशावधिः प्रमत्तादिक्षीणकषायांतचरमांगे च परमावधिसर्वावधी, तथावधिदर्शनमपि। तत्र घर्मादित्रयजाः सतीर्थाः तीर्थमनुष्यगतित्रिंशत्कं तत्रातीर्थाः अंजनादिजाश्च मनुष्यगतिनवविंशतिकं। तिर्यंचः देवगतियुताष्टाविंशतिकं। मनुष्यास्तदादीनि पंच। सौधर्मादयस्तीर्थसत्त्वा मनुष्यगतितीर्थयुतत्रिंशत्कं। भवनत्रयादयस्तदसत्त्वाः मनुष्यगतिनवविंशतिकं। केवलदर्शने केवलज्ञानवच्छून्यं ॥ ५४८ ॥

स० चं०–सूक्ष्मसांपराय संयमविषैं अंतका एकका ही स्थान है। यथाख्यातविषैं केवलज्ञानवत् बंधका शून्य है। बहुरि देशसंयमविषैं आहारकवत् देवगतियुत अठाईसका अर देवगति तीर्थंकर युत गुणतीसका ए दोय हैं। तहां देशसंयम सहित तिर्यंचविषैं देवगतियुत अठाईसका ही है। बहुरि असंयमविषै कार्माणवत् आदिके छह स्थान हैं। तहां नारकी मिथ्यादृष्टि सासादनविषैं पंचेंद्री पर्याप्त तिर्यंचगतियुक्त वा मनुष्यगतियुक्त गुणतीस अर उद्योत सहित तीसका ए दोय हैं। मिश्रविषैं मनुष्यगति युत गुणतीस का ही है। असंयतविषैं घर्मादि तीन विषैं मनुष्यगतियुत गुणतीस अर मनुष्यगति तीर्थ सहित तीसका ए दोय हैं। अवशेष पृथ्वीनिविषैं मनुष्यगतियुक्त गुणतीसका ही है। बहुरि तिर्यंचगतिविषैं तेईसकानैं आदि देकरि छह हैं। तहां इतना विशेष–जो पर्याप्त अपर्याप्त एकेंद्री विकलेंद्रीनिविषैं अर अपर्याप्त पंचेंद्रीविषैं नरकगति देवगतियुत अठाईसका बंधस्थान नाहीं है बहुरि बादर सूक्ष्म पर्याप्त अपर्याप्त तेजःकायिक वातकायिकनिविषैं मनुष्यगति अपर्याप्तयुक्त पचीसका अर पर्याप्त मनुष्यगतियुत गुणतीसका ए दोय नाहीं है। बहुरि प्रथमोपशम सम्यक्त्व तीह संयुक्त देशव्रत ताकी विराधनाकरि सासादन भया ऐसा तिर्यंच सो तिर्यंच गतियुत वा मनुष्यगति युत गुणतीसका अर उद्योत युत तीसका अर देवगतियुत अठाईसका ऐसैं तीनस्थान बांधे है। मरण होतैं नरक विना और गतिनिविषैं उत्कृष्ट एक समय घाटि छह आवली जघन्य एक समय पर्यंत अपर्याप्त दशामें सासादन होहै तातैं सासादन तिर्यंच है सो 'णहि सासणो अपुण्णे साहारणसुहुमगे य तेउदुगे' इस वचनतैं एकेंद्री विकलेंद्री संज्ञी असंज्ञी जीव ही अपर्याप्त सासादनवर्ती हैं सो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नरकगति वा देवगति युत अठाईसकौं न बांधता शरीर पर्याप्तिके पहिले ही सासादनपणां छाडि नियमतैं मिथ्यादृष्टी होइ पर्याप्त अवस्थाके ऊपरि ही नरकगतियुत वा देवगति युत अठाईसके स्थानकौं बांधैं है। 'मिच्छदुगेदेवचऊ तित्थं णहिं' इस वचनतैं संज्ञी असंज्ञी भी अपर्याप्त दशायुक्त सासादनविषै अठाईसका स्थान बांधै है बहुरि तिर्यंच मिश्र व असंयत गुणस्थानवर्ती है सो संज्ञी पर्याप्त ही हैं सो मिश्रविषैं तो देवगति युक्त अठाईसकौं ही बांधैं हैं जातैं 'उवरिम छण्हं च छिदी' इस वचनतैं तिर्यंच मनुष्यगति बंधनेका याकैं अभाव है। बहुरि असंयतविषैं भी सोई स्थान बंधे है जातैं तिर्यंच जीवविषैं तीर्थंकर आहारकका बंध नाहीं है। बहुरि असंयम सहित मनुष्यविषै मिथ्यादृष्टिविषैं लब्धि अपर्याप्तक मनुष्यकैं तौ नरकगति देवगति युत अठाईसका विना तेइसकानैं आदि देकरि छह स्थान हैं। बहुरि पर्याप्त मनुष्यकैं च्यारचो गति सहित छहौ स्थान पाइए है। बहुरि 'चदुगादि मिच्छो सण्णी' इत्यादिक सामग्री सहित जीव करणलब्धीका अंत समयविषैं दर्शन मोहकौं उपशमाइ प्रथमोपशम सम्यक्त्वी भया वा प्रथमोपशम सम्यक्त्व सहित देशव्रती वा महाव्रती भया तिस उपशम सम्यक्त्वका अंतर्मुहूर्त कालविषै एक समयतैं लगाय छह आवली पर्यंत कोईका अवशेष रहैं अनंतानुबंधीनिका अप्रशस्त उपशम भया था तिसविषै एक कोई क्रोधादिकका उदय होतैं पाया था जो प्रथमोपशम सम्यक्त्व गुण ताका घातकरि सासादन भया ऐसा मनुष्य सो एकेंद्री विकलेंद्रीका तौ मिथ्यादृष्टिविषैं ही बंध है तातैं पंचेंद्री पर्याप्त तिर्यंच गति वा मनुष्यगतियुत गुणतीसका स्थानकौं वा उद्योतयुत तीसकाकौं वा देवगतियुत अठाईसकाकौं बांधै है। बहुरि मरणविषैं तिर्यंच वा मनुष्य वा देव यावत् काल अपर्याप्त दशाविषैं सासादन रहै तावत् काल तौ गुणतीस वा तीसके दोय ही बांधै नरकगति देवगति युत अठाईसकाकौं न बांधै। बहुरि सासादनका काल पूर्णभए पीछैं मिथ्यादृष्टि होइ तहां जितना-काल निर्वृत्ति अपर्याप्त दशाका अवशेष रहैं तिसविषै अठाईसका विना पचीसकानैं आदि देकरि पांच स्थाननिकौं बांधैं। बहुरि पर्याप्त अवस्थाविषै अठाईसका सहित छह स्थान बांधैं। बहुरि कर्मभूमिया वा भोगभूमिया मनुष्य मिश्र वा असंयत गुणस्थानवर्ती सो देवगतियुत अठाईसकौं ही बांधै है जातैं नरक तिर्यंच गतिका सासादनहीविषैं बंध ७२०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्युच्छेद भया है। बहुरि विग्रहगतिविषै तीर्थंकर वा निर्वृत्त्यपर्याप्त अवस्थाविषै तीर्थंकर वा गर्भ अवस्थाविषै तीर्थंकर वा जन्म अवस्थाविषै तीर्थंकर वा कुमार अवस्थाविषैं तीर्थंकर बहुरि जाकैं देवायु नरकायुका पूर्वै बंध भया अर पीछैं तीर्थंकर बंधका प्रारंभ कीया असा जीव वा तीर्थंकर सत्त्वका धारी चरमशरीरी मनुष्य असंयत गुणस्थानवर्ती सो देवगति तीर्थंकर सहित गुणतीसका स्थानकौं ही बांधैं है। बहुरि असंयम सहित देव सो पर्याप्त दशाविषैं मिथ्यादृष्टी भवनत्रिक सौधर्मद्विकवाले तौ एकेंद्री पर्याप्त तिर्यंचगति सहित पचीसका वा आतप उद्योत युक्त छवीसका वा पंचेंद्री पर्याप्त तिर्यंच मनुष्यगति युत गुणतीसका वा तिर्यंच उद्योत सहित तीसका असैं च्यारि स्थानकों बांधे हैं और सानत्कुमारादि दश स्वर्गवाले मनुष्य तिर्यंच गति सहित गुणतीसका वा तिर्यंचगति उद्योत सहित तीसका स्थानकौं बांधै हैं। बहुरि आनतादि स्वर्ग अर नवग्रैवेयकवाले ते मनुष्यगति सहित गुणतीसका स्थानकौं ही बांधै हैं। अब देवनिकी निर्वृत्त्यपर्याप्त अवस्थाविषै बंध कहैं हैं तातैं देवविषैं कौन कैसै उपजै हैं? सो कहै हैं—

मनुष्यलोक संबंधी तीस भोगभूमिके तिर्यंच मनुष्य वा मानुषोत्तर स्वयंप्रभ पर्वतके वीचि असंख्यात द्वीप समुद्र संबंधी जघन्य तिर्यंच भोगभूमिके संज्ञी तिर्यंच वा लवणोद कालोदविषैं छिनवै कुमानुष द्वीप वासी कुमनुष्य सो नियमतैं अपनी आयुके नव महिने अवशेष रहैं आठ अपकर्षनिविषैं कहीं त्रिभाग अवशेषविषैं देवायुकौं बांधि भुज्यमान आयुका नाशतैं भवनत्रिकविषैं वा कल्पवासिनी स्त्रीविषैं मिथ्यादृष्टी होइ उपजैं तहां यावत् शरीर पर्याप्ति पूर्ण न होइ तावत् निर्वृत्त्यपर्याप्त हैं। इहां औरनिके कथन निमित्त प्रासंगिक गाथा कहिए है—

सव्वट्ठोत्ति सुदिट्ठी महव्वई भोगभूमिजा सम्मा।
सोहम्मदुगं मिच्छा भवणातियं तावसा य वरं ॥ १॥

मिथ्यादृष्टि भोगभूमिया अर तापसी ते वर उत्कृष्टपनैं भवनत्रिकविषैं उपजैं हैं अन्यत्र नाहीं। बहुरि भरत ऐरावत विदेहवासी वा स्वयंभूरमण द्वीपका अपरार्ध अर स्वयंभूरमण लवणोद कालोद समुद्र तिनके वासी जीव केई जलचर, थलचर नभचर संज्ञी पर्याप्त भद्र मिथ्यादृष्टी अर उपशम ब्रह्मचर्य सहित वानप्रस्थ वा एकजटी शत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जटी सहस्रजटी वा नागा वा कांजी भक्षणवाले वा कंदमूल पत्र पुष्प फलके खानेवाले वा अकाम निर्जरा संयुक्त वा एकदंडी त्रिदंडी मिथ्यातपश्चरण रूप परिणए ते कायक्लेशादि आचरणकरि कोई अपनी अपनी विशुद्धताके अनुसारि भवनत्रिकादिक अच्युत स्वर्गपर्यंत उपजैं हैं । अकाम कहिए अपने अभिलाष विना बंधनादिककरि क्षुधा तृषाका सहना ब्रह्मचर्य धारना भूमिविषैं सोवना मलादिक धारना परीषहादिक सहना इन करि जो निर्जरा होइ सो अकाम निर्जरा कहिए। बहुरि मिथ्यादर्शन सहित मोक्ष उपाय रहित बहुत काय क्लेश करना कपटरूप बहुत व्रत धारना सो बालतप कहिए, ए भी देवविषै उपजनेकौं कारण हैं। सो इहां तिनके उपजनेकी प्रासंगिक गाथा कहिए है—

चरिया य परिव्वाजा बम्होत्तरचुदपदोत्ति आजीवा।
अणुदिसअणुत्तरादो चुदा ण केसवपदं जंति ॥ २ ॥

चरकाः कहिए नागा परिव्राजक कहिए सन्यासी एकदंडी त्रिदंडी ए उत्कृष्ट भवनत्रिकादिक ब्रह्मस्वर्गपर्यंत उपजै हैं बहुरि आजीवा कहिये कांजीके भक्षण करनेवाले उत्कृष्ट भवनत्रिकादिक अच्युत स्वर्गपर्यंत उपजैं हैं। बहुरि अनुदिश अनुत्तर विमानवासी देव द्विचरम शरीरी हैं तातैं ते मरि नारायण प्रतिनारायण नरकगामी जीवनिविषैं नाहीं उपजै हैं। बहुरि सादि वा अनादि वा अभव्य जो मिथ्यादृष्टी अर्हंतके द्रव्य लिंगका धारी वाह्य छै प्रकार तपविषैं मग्न त्रिकाल देववंदनादिक क्रिया सहित दर्शन चारित्र मोहरूप घातिया कर्मका जाकैं उदय पाइए उपशम ब्रह्मचर्यादिक संयुक्त द्रव्यलिंगी सो उपरिम ग्रैवेयक पर्यंत उपजै है। बहुरि ऊपरि नाही। यहां प्रासंगिक गाथा कहिए है—

णरतिरियदेसअयदा उक्कस्सेणच्चुदोत्ति णिग्गंथा।
णरअयददेसमिच्छा गेव्वेज्जंतोत्ति गच्छंति ॥ ३ ॥

तिर्यंच मनुष्य देशसंयत वा असंयत ते उत्कृष्टपनैं अच्युत स्वर्गपर्यंत उपजैं हैं अर द्रव्यलिंगी जिनरूप महाव्रती

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावा असंयत वा देश संयत वा मिथ्यादृष्टी ते उपरिम ग्रैवेयक पर्यंत उपजैं हैं ऐसैं देवनिविषैं उपजना कह्या तिनविषैं निर्वृत्त्यपर्याप्त मिथ्यादृष्टी भवनत्रिक देव वा कल्पवासिनी स्त्री वा सौधर्म ईशानवाले जे एकेंद्री पर्याप्तयुत पचीसका अर आतप उद्योतयुत पर्याप्त तिर्यंचगति एकेंद्री सहित छवीसका अर पंचेंद्री पर्याप्त तिर्यंच गतियुक्त वा मनुष्यगति युक्त गुणतीसका वा उद्योत सहित तीसका ऐसैं च्यारि स्थाननिकौं बांधै है। बहुरि तैसैंही सनत्कुमारादिक दशस्वर्गके वासी पंचेंद्री पर्याप्त तिर्यंच गतियुत वा मनुष्यगतियुत गुणतीसकौं अर उद्योत तिर्यंचगति पंचेंद्री सहित तीसकौं बांधैं है। बहुरि आनतादि उपरिम ग्रैवेयकवाले मनुष्यगतियुक्त गुणतीसकाकौं ही बांधै हैं जातैं तिर्यंचगति सहित गुणतीस तीसका इहां बंध नाहीं ऐसैं संक्षेपतैं असंयम सहित मिथ्यादृष्टि जीवनिकैं देवगति अपेक्षातैं नामकर्मके बंधस्थान कहे। इहां जीवसमास पर्याप्ति प्राणादिककी विवक्षाकरि ग्रंथ बधनेके भयतैं न कहैं हैं। परमागमके ज्ञायकनिकरि लगायलेने। आगैं असंयत सहित (अ) पर्याप्त सासादनविषैं कहिए है—

संज्ञी पर्याप्त गर्भज विशुद्धता सहित साकार ज्ञान उपयोगका धारी मिथ्यादृष्टि ऐसा भोगभूमिया तिर्यंच तौ जातिस्मरण वा देव संबोधनतैं अर तीस भोगभूमिका तिर्यंच जातिस्मरण वा देव संबोधन वा चारणमुनि संबोधनतैं प्रथमोपशम सम्यक्त्वकौं ग्रहिकरि असंयत गुणस्थानवर्ती होय अर स्वयंप्रभाचल पर्वतके परैं कर्मभूमिका तिर्यंच जातिस्मरण वा देव संबोधनतैं प्रथमोपशम सम्यक्त्वकौं पाइ असंयत होइ वा प्रथमोपशम सम्यक्त्व सहित देशसंयमकौं पाइ देश संयत होइ बहुरि पंद्रह कर्मभूमिके वासी तिर्यंच जातिस्मरण वा देव मनुष्य संबोधन वा जिन बिंबदर्शनतैं तैसैं ही असंयत वा देश संयत होइ। बहुरि तैसा ही मनुष्य तैसैंही असंयत वा देशसंयत होइ वा कोई मनुष्य प्रथमोपशम सम्यक्त्व सहित महाव्रत अंगीकार करि अप्रमत्त गुणस्थानवर्ती होइ। यहु अप्रमत्त कोई उतरि करि प्रमत्तविषैं आवै। बहुरि कोई जीव द्वितीयोपशम सम्यक्त्वकौं अंगीकार करि श्रेणीं चढि अनुक्रमतैं उतरि असंयत वा देशसंयत वा प्रमत्त होइ। ए प्रथम द्वितीयोपशम सम्यक्त्वके धारी जीव ते अपने पर्यायका अंतविषैं जघन्य एक समय उत्कृष्ट छह आवली अवशेष रहैं केई एक अनतानुबंधी कषायके उदय करि सासादन होंइ ७२३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain, Digitized by Sarayu Trust/eGangotri

केई पूर्वें देवायु बांध्या था ते मरिकरि अर केई पूर्वें आयु न बाध्या ते तहां अंत समयविषैं देवायु बांध मरिकरि देव निर्वृत्ति अपर्याप्त सासादन गुणस्थानवर्ती होंइ ते भवनत्रिक कल्पवासिनी स्त्री सौधर्म द्विकवाले देव तो तहां पंचेंद्री तिर्यंच मनुष्यगति पर्याप्तयुत गुणतीसका वा तिर्यंचगति उद्योत पर्याप्तयुत तीसका स्थानकौं बाधै हैं। अर सासादनकालकौं उलंघि मिथ्यादृष्टि होइ, तिन दोऊ स्थाननिकौं अर यावत् शरीर पर्याप्ति पूर्ण न होइ तावत् एकेंद्री पर्याप्त युत पचीसका वा उद्योत आतप एकेंद्री पर्याप्तयुत छत्तीसका स्थानकौं बाधै हैं बहुरि सनत्कुमारादि दश स्वर्गवाले तहां तिन गुणतीस तीसके दोऊ स्थाननिहीकौं बाधै हैं। बहुरि आनतादि स्वर्ग अर नवग्रैवेयक वाले तहां मनुष्यगतियुत गुणतीसके स्थानहीकौं बांधै हैं बहुरि सासादनका काल व्यतीत भएं पीछे तिस निर्वृत्ति अपर्याप्त मिथ्यादृष्टिवत् स्थाननिकौं बाधै हैं। बहुरि भवनत्रिकादिक उपरिम ग्रैवेयक पर्यंत मिश्र गुणस्थानवर्ती अर पर्याप्त भवनत्रिक कल्पवासिनी स्त्री असंयत गुणस्थानवर्ती ते मनुष्यगतियुत गुणतीसके स्थानकौं बाधैं हैं बहुरि वैमानिक देव तीर्थ रहित तिसही गुणतीस के स्थानकौं अर तीर्थ सहित तीसके स्थानकौं बाधै हैं।

बहुरि चक्षु दर्शन अर अचक्षु दर्शनविषैं सर्व बंध स्थान हैं। तहां चक्षु दर्शनसहित नारकी गुणतीस तीसके दोय स्थानकौं बाधै है चौंद्री जीव अठाईसके स्थान विना तिर्यंच मनुष्यगतियुत तेईसकानै आदि देकर पांच स्थान बाधै हैं। पंचेंद्री तिर्यंच तेईसकानै आदि देकरि छह स्थान बांधै है मनुष्य सर्व स्थाननिकौं बांधै है। देव यथायोग्य पचीस छवीस गुणतीस तीस के च्यारि स्थाननिकौं बाधै हैं। बहुरि अचक्षुदर्शन सहित नारकी चक्षुदर्शनवत् दोयकौं अर एकेंद्रिय आदि चौंद्रिय पर्यंत नरक देवगतियुत अठाईसके विना तेईस आदि पांचकौं अर पंचेंद्री तिर्यंच तिस सहित छहकौं अर मनुष्य सर्वस्थाननिकौं अर देव चक्षुर्दर्शनवत् च्यारि स्थाननिकौं बाधै हैं। बहुरि अवधि दर्शनविषैं अवधिज्ञानवत् अंतके पांच स्थान हैं। असंयत देवनारकीविषैं वा असंयत देशसंयत संज्ञी पर्याप्त तिर्यंच विषैं वा असंयतादि क्षीण कषाय पर्यंत मनुष्यविषैं देशावधि ज्ञान है अर प्रमत्तादि क्षीण कषाय चरम शरीरी विषै परमावधि वा सर्वावधि पाइए है सो ऐसैं अवधिज्ञानी जीवनिकैं ही अवधि दर्शन पाइए है। तहां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवधि दर्शनके धारी घर्मादि तीन नरकवाले तीर्थंकर मनुष्यगतियुत तीसकौं अर तीर्थंकर सत्त्व रहित घर्मादिवाले वा अंजनादिवाले मनुष्यगति गुणतीसकेकौं बांधै हैं। बहुरि तिर्यंच हैं ते देवगतियुत अठाइसकेकौं बांधै हैं। बहुरि मनुष्य हैं ते देवगतियुत अठाईसकानें आदि देकरि एकका पर्यंत पांचकौं बांधै हैं। बहुरि देव हैं ते सौधर्मादिकवाले तीर्थ सत्व सहित तीर्थंकर मनुष्यगतियुत तीसकेकौं अर तीर्थ सत्व रहित भवनत्रिकादिक ते मनुष्यगतियुत गुणतीसकेकौं बांधै हैं बहुरि केवल दर्शन केवलज्ञानवत् बंध शून्य है ॥ ५४८ ॥

कम्मं वा किण्हतिये पणुवीसाछक्कमट्ठवीसचऊ।
कमसो तेऊजुगले सुक्काए ओहिणाणं वा ॥ ५४९ ॥

कर्म वा कृष्णत्रये पंचविंशतिषट्कमष्टाविंशचतुष्कं ।
क्रमशः तेजोयुगले शुक्लायामवधिज्ञानं वा ॥ ५४९ ॥

जी० प्र०—कृष्णाद्यशुभलेश्यात्रये बंधस्थानानि कार्मणयोगवदाद्यानि षट्। तेजोलेश्यायां पचविंशतिकादीनि षट्। पद्मलेश्यायामष्टाविंशतिकादीनि चत्वारि। शुक्ललेश्यायामवधिज्ञानवच्चरमाणि पंच। वर्णनामोदयसंपादितशरीरवर्णो द्रव्यलेश्या सा नात्र विवक्षिता। मोहोदयोपशमक्षयक्षयोपशमजनितजीवस्पंदनं भावलेश्या, सा च कृष्णादिभेदेन षोढा। प्रथमनरकप्रथमेंद्रके कपोतजघन्यांशः। तृतीयनरकद्विचरमेंद्रके तदुत्कृष्टांशः। तच्चरमेंद्रके नीलजघन्यांशः। पंचमनरकद्विचरमेंद्रके तदुत्कृष्टांशः। तच्चरमेंद्रके कृष्णाजघन्यांशः। सप्तमनरकावधिस्थानेंद्रके तदुत्कृष्टांशः। तयोस्तयोर्मध्ये स्वस्वमध्यमांशो भवति। तत्रोत्पत्तियोग्यमिथ्यादृष्टिजीवाः घर्मायां कर्मभूमिषट्संहननाः असंज्ञिसरीसृपपक्षिभुजंगसिंहवनितामत्स्यमनुष्या एव। तत्रापि वंशायां सरीसृपादय एव। मेघायां पक्ष्यादय एव। अंजनायां आद्यपंचसंहनना एव भुजंगादय एव। अरिष्टायां केसर्यादय एव। मघव्यां आद्यचतुःसंहनना एव वनितादय एव। माघव्यामाद्यसंहनना एव मत्स्यमनुष्या एव। ते च तत्रोत्पन्नाः शरीरे पूर्णेऽपूर्णे च तिर्यग्मनुष्यगतिनवविंशतिकत्रिंशत्के द्वे बध्नंति। सप्तम्यां ते द्वे तिर्यग्गतियुते एव। तत्सासादनाः ते तिर्यग्मनुष्यगतियुते। मिश्रा असंयताश्च मनुष्यगतिनवविंशतिकमेव। घर्मायां निर्वृत्त्यपर्याप्ताः पर्याप्ताश्च क्षायिकवेदककृतकृत्यवेदकास्तदेव, सतीर्थाः मनुष्यगतितीर्थयुतत्रिंशत्कमेव। वंशामेघयोः सतीर्थाः पर्याप्तत्वे नियमेन मिथ्यात्वं त्यक्त्वा सम्यग्दृष्टयो भूत्वा तत्त्रिंशत्कमेव। तिर्यग्गतौ पर्याप्तादित्रिविधसर्वैकद्वित्रिचतुरिंद्रियेषु लब्ध्यपर्याप्तनिर्वृत्त्यपर्याप्तासंज्ञिनि मिथ्यादृष्टिनरकाद्यागतसासादनापर्याप्तसंज्ञिनि च लेश्या अशुभा एव तिस्रः। पर्याप्तमिथ्यादृष्ट्यसंज्ञिनि कृष्णाद्याश्चतस्रः। पर्याप्तसासादनमिश्रपर्याप्तापर्याप्तासंयतसंज्ञिनि षट्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भोगभूमौ निर्वृत्त्यपर्याप्तासंयते कापोतजघन्यं । मिथ्यादृष्टौ सम्यग्दृष्टौ वा तत्पर्याप्ते शुभा एव तिस्रः । तत्रत्यानां शरीरपर्याप्तौ पूर्णायां तत्त्रये एवागमनात् । एषामुक्ततिर्यग्जीवानां मध्ये ये दिरसूक्ष्मपृथ्व्यप्तेजोवायुनित्यचतुर्गतिनिगोदप्रतिष्ठिताप्रतिष्ठितप्रत्येकद्वित्रिचतुरसंज्ञिसंज्ञिपंचेंद्रियलब्ध्यपर्याप्तास्ते च तेभ्यो वा तदेकान्नविंशतिविधपर्याप्तेभ्यो वा पर्याप्तापर्याप्तकर्मभूमिमनुष्येभ्यश्च मिथ्यादृष्टिभ्य एवागत्याशुभलेश्यात्रयेणोत्पद्यंते ते च विनाष्टाविंशतिकं त्रयोविंशतिकादीनि पंच बध्नंति । तेजोवायुकायिकास्तु तिर्यग्गतियुतान्येव । ते चत्वारिंशद्विधमिथ्यादृष्टयः, अशुभलेश्यात्रयेण मृतास्तदेकान्नविंशतिविधपर्याप्ततिर्यग्मिथ्यादृष्टिषूत्पद्यंते । तत्र तेजोवायुषु त्र्यशुभलेश्यामध्यमांशैरेव, भवनत्रयसौधर्मद्वयमिथ्यादृष्टयः तेजोमध्यमांशेन तिर्यग्मनुष्या अशुभत्रयमध्यमांशेन च मृताः केचिद्बादरपृथ्व्यप्प्रतिष्ठितप्रत्येकेषूत्पद्यंते । भवनत्रयादिसहस्रारांतदेवसर्वनारकमिथ्यादृष्टयः बद्धतिर्यगायुषः स्वस्वलेश्याभिर्मृताः कर्मभूमिगर्भसंज्ञितिर्यक्षूत्पद्यंते । ते च एकान्नविंशतिधाचतुर्गत्यागतनिर्वृत्त्यपर्याप्तमिथ्यादृष्टयः सर्वाण्यष्टाविंशतिकोनत्रयोविंशतिकादीनि पंच बध्नंति । अनंतानुबंध्यन्यतमोदयेन प्रथमोपशमसम्यक्त्वं विराध्य सासादना भूत्वा प्राग्बद्धतिर्यगायुष्का मृत्वा अबद्धायुष्काः केचित्तदैव तिर्यगायुर्बध्वा मृत्वा च कर्मभूमितिर्यग्मनुष्यास्तदा वादरपृथ्व्यप्प्रत्येकविकलत्रयसंज्ञ्यसंज्ञिषु देवास्तदा स्वस्वलेश्याभिरीशानांता वादरपृथ्व्यप्प्रत्येकेषु भवनत्रयादिसहस्रारांता षष्ठनरकांतनारकाश्च कर्मभूमिगर्भजसंज्ञितिर्यक्षु च सासादना भूत्वा तिर्यग्मनुष्यगतिपर्याप्तनवविंशतिकत्रिंशत्के बध्नंति । स्वस्वसासादनकालमतीत्य नियमेन मिथ्यादृष्टयो भूत्वा यावच्छरीरमपूर्णं तावन्निर्वृत्त्यपर्याप्ताः मिथ्यादृष्ट्युक्तत्रयोविंशतिकादीनि पंच बध्नंति । ननूत्कृष्टः सासादनकालः षडावलिः आयुर्बंधाद्धा जघन्याप्यंतर्मुहूर्तमात्री तर्हि पूर्वोत्तरभवयोः कथं सासादनत्वमिति ? तन्न, आवलितः समयाधिकक्रमेण समयोनमुहूर्तपर्यंतानां कालविशेषाणां अंतर्मुहूर्तत्वेन विरोधाभावात् । तिर्यगसंयते प्राग्बद्धतिर्यगायुर्देवनारकवेदकसम्यग्दृष्टयः स्वस्वलेश्याभिरुत्पद्यंते । तेऽपि न सप्तमपृथ्वीजाः मिथ्यादृष्टित्वे एवैषां मरणात् । ते चोत्पन्नतिर्यगसंयता देवगत्यष्टाविंशतिकं बध्नंति । पर्याप्तेरुपरि देशसंयतांतगुणस्थाना भवंति । तत्र असंयतांतं षड्लेश्याः, देशसंयते शुभत्रिलेश्याः ।

ननु शुभाशुभलेश्यास्वेकजीवः क्रमेण परिणमेदक्रमेण वा ? उच्यते—आत्मा संक्लेशहान्या कृष्णोत्कृष्टादाकपोतजघन्यं संक्लेशवृद्ध्या कपोतजघन्यादाकृष्णोत्कृष्टं चासंख्यातलोकमात्रषट्स्थानपतितलेश्यास्थानेषु क्रमेण परिणमति । विशुद्धिवृद्ध्या तेजःपद्मशुक्लजघन्याद्यंशेषु विशुद्धिहान्या तेष्वन्यथा च परिणमति । तासां च लेश्यानां मूलकारणं कषायोदयानुभागस्थानानुरंजितयोगप्रवृत्तिः । ते कषायाश्चत्वारः । तेषु विवक्षितक्रोधकषायानुभागस्थानोदयः जीवनरकतिर्यग्मनुष्यदेवगतिषूत्पादकः । तच्छक्तिः शिलाभेदपृथ्वीभेदधूलिराजिजलराजिसमाना । तत्रैसर्वघातिशक्तियुतोदयस्थानेभ्योऽधस्तनी प्रमत्तादिसंयमिष्वेव संभविनी देशघातिनी पूर्वस्पर्धकनामा । तदधोधः अपूर्वस्पर्धकनामा वादरकृष्टिनामा लोभकषाये सूक्ष्मसांपराये सूक्ष्मकृष्टिनामापि । तान्यशेषक्रोधकषायानुभागोदयस्थानान्यसंख्यातलोकमात्रषड्ढानिवृद्धिपतितासंख्यातलोकमात्राणि तेष्वसंख्यातलोकभक्तबहुभागमात्राणि संक्लेशस्थानानि तदेकमात्रभागमात्राणि विशुद्धिस्थानानि । तेषु लेश्यापदानि चतुर्दश लेश्यांशाः षड्विंशतिः । तत्र मध्यमा अष्टौ आयुर्बंधनिबंधनाः । संदृष्टिः—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

≡ ३८ । श्र । मे । तीव्रतर । नर ६	पृ । मे ≡ ३८ तीव्र । तिर्यग्गतिनिबंधनानि ९ । ९	धू । रा । मंद । मनुष्यगतिनिबंधनानि ≡ ३ । ८ ६ । ६ । ६	जल=रा । देव । मंदतर ≡ ३१ ६ । ६ । ६
उ ० ० ० १ ० ० ० ज	१ २ ३ ४ ५ ६	५ ४ ३ २ १	१
कृ १ १ १ १ १ १ १ १ ० ० ० ० ० ० ० ०	ते क शु प नो १११११२२२२ ३३३३३३३३३३३३४४४४ ५५५५६६६६ ००००००००००००००००००००००००००००००	कृ नो क ते प ६६६६ ६६६६६६६६६ ५५५५४४४४३३३३ २२२२११११ ००००००००००००००००००००००००००००००	शु ११११ ११११ ०००० ००००
० ० ० ० न १ १ १ १ उ	११११११११११११२२२२३ ३३३४४४४४४४४४४४ उ उ ज ज ज	४४४३३३३२२२२११११ ११११ ११११ ०००० ०००० ज ज ज उ उ	०००००००० उ

ते मध्यमांशास्तु तेजोलेश्याजघन्यस्थानानंतरस्वमध्यमानंतगुणवृद्धिस्थानमादिं कृत्वा कपोतलेश्याजघन्यस्थानानंतरस्वमध्यमानंतगुणवृद्धिस्थानपर्यंतं वा कपोतलेश्याजघन्यस्थानानंतरस्वमध्यमानंतगुणवृद्धिस्थानमाद्यं कृत्वा तेजोलेश्याजघन्यस्थानानंतरस्वमध्यमानंतगुणवृद्धिस्थानपर्यंतं पद्मशुक्लकृष्णनीलजघन्यांशाश्चत्वारः चतुर्गत्यायुर्बंधनिबंधननरकवर्जितत्र्यायुर्बंधनिबंधननरकतिर्यग्वर्जिततद्द्व्यायुर्बंधनिबंधनकेवलदेवायुर्बंधनाश्चत्वारः एवमष्टौ । अत्र पद्मशुक्लकृष्णनीलजघन्यांशानां मध्यमत्वं तु शुभाशुभलेश्याविभागापेक्षं शेषाष्टादशांशाः चतुर्गतिगमनकारणानि तेषु सुभगत्रयस्य नवांशाः । नरकगतौ तिर्यग्गतौ चोत्पादकाः अग्रतनाः शुभाशुभलेश्यांशास्तु तिर्यग्मनुष्यदेवगतिगमनकारणानि । लेश्यासंक्रमणं तु कृष्णशुक्लयोर्वृद्धावग्रेऽन्यलेश्याभावात्स्वस्थाने एव हानौ स्वोत्कृष्टात्स्वजघन्यपर्यंतं स्वस्थाने कृष्णायाः नीलकपोततेजःपद्मशुक्लोत्कृष्टपर्यंतं शुक्लायाः पद्मतेजःकपोतनीलकृष्णोत्कृष्टपर्यंतं च परस्थाने स्यात् । शेषाणां हानौ स्वस्वोत्कृष्टादास्वस्वजघन्यं स्वस्थाने परस्थाने तु नीलकपोतयोः स्वस्वजघन्यादाशुक्लोत्कृष्टं पद्मतेजसोराकृष्णोत्कृष्टं च स्यात् । वृद्धौ स्वस्थाने स्वस्वजघन्यादास्वस्वोत्कृष्टं । परस्थाने तु नीलकपोतयोः स्वस्वोत्कृष्टादाकृष्णोत्कृष्टं पद्मतेजसोराशुक्लोत्कृष्टं च स्यात् । न च स्वस्थाने परस्थानवत्परलेश्यासदृशशक्तिस्थानं संक्रामति स्वस्वलक्षणस्यात्यजनात् । स्वस्थानसंक्रमणे सर्वलेश्यानामुत्कृष्टानंतरस्वमध्यमस्थाने हानिरनंतभागातिका तदुत्कृष्टस्योर्ध्वं कृत्वा च तासां जघन्यादनंतरस्वमध्यमस्थाने वृद्धिरपि सैव तज्जघन्यस्याष्टांकत्वात् । परस्थानसंक्रमणे तासां जघन्याद्धानिरनंतगुणा इतरलेश्यापेक्षया तज्जघन्यानामष्टांकत्वात् । तत्तिर्यग्मिथ्यादृष्टौ मिथ्यात्वेन सहानंतानुबंध्यादिसर्वघातिक्रोधचतुष्कं वा मानचतुष्कं वा मायाचतुष्कं वा लोभचतुष्कमुदेति । सासादने तदेव विना मिथ्यात्वं मिश्रे पुनरनंतानुबंध्यूनं युतं जात्यंतरसर्वघातिसम्यग्मिथ्यात्वेन । असंयते सम्यग्मिथ्यात्वोनं दर्शनमोहस्य क्षयोपशमे युतं देशघातिसम्यक्त्वप्रकृत्या वियुतमुपशमे क्षये च । देशसंयते पुनरप्रत्याख्यानोनं युतं दर्शनमोहस्य क्षयोपशमे तया वियुतमुपशमे तथापि तिर्यग्देशसंयते संक्लेशहानौ जातानि त्र्यशुभलेश्याकारणकषायोदयस्थानान्यसंख्यातैकभागत्वेप्यसंख्यातलोकमात्राणि शेषबहुभागाः षड्लेश्योदयस्थानानि मिथ्यादृष्टयादिचतुष्के भवंति । तत्र मिथ्यादृष्टौ त्रयोविंशतिकादीनि षट् बध्यंते । सासादनेऽष्टा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विंशतिकादीनि त्रीणि मिश्रादित्रये उवरिमछण्हं च छिदीसासणसम्मे इत्यष्टाविंशतिकमेव। मनुष्यपूर्वभवे योग्यद्रव्यदातृगुणरहिता पात्रदानेन तदनुमोदेन वा तिर्यङ् दानानुमोदेनैव मिथ्यादृष्टित्वेन तिर्यगायुर्बद्ध्वा अशुभलेश्याभिर्भोगभूमितिर्यग्मिथ्यादृष्टिर्भूत्वा अपुण्णेतिरियुगुतीसं तीसं णरउगुतीसं च बंधदि। बद्धतिर्यगायुर्मरणे प्रथमोपशमसम्यक्त्वमनंतानुबंध्युदयेन विराध्य तिर्यग्मनुष्यो वा भोगभूमौ नारकादिकर्मभूमौ च त्र्यशुभलेश्याभिस्तिर्यक्सासादनो भूत्वा तद्द्वयमेव। मिच्छदुगे देव चऊ तित्थं णोति सुराष्टाविंशतिकं पर्याप्तिष्वेत्यर्थः । कर्मभूमेस्तिर्यग्मनुष्यवेदकसम्यग्दृष्टिः मनुष्यक्षायिकसम्यग्दृष्टिर्वा प्राग्बद्धतिर्यगायुस्त्रिधापात्रदानतदनुमोदेन त्रिविधकपल्यप्रमाणां कृत्वा त्रिधाभोगभूमौ कपोतलेश्याजघन्यांशेनोत्पद्य वेदकसम्यग्दृष्टिः कृत्यकृत्यवेदकसम्यग्दृष्टिः क्षायिकसम्यग्दृष्टिर्वा देवगत्यष्टाविंशतिकमेव। भोगे सुरट्ठवीसं सम्मो इति नियमात्। पर्याप्तेरुपरि चतुर्गुणस्थानवर्ती शुभत्रिलेश्य एव। तत्र मिथ्यादृष्टिः सासादनश्च सुराष्टाविंशतिकादित्रयं २८ दे २९ ति म ३० ति उ। मिश्रोऽसंयतश्च देवगत्यष्टाविंशतिकमेव तिर्यग्मनुष्यगतियुतस्थानयोस्सासादने एवच्छेदात्।

मनुष्यगतौ लब्ध्यपर्याप्ते त्र्यशुभलेश्ये निर्वृत्त्यपर्याप्ते च षड्लेश्ये मिथ्यादृष्टौ २३, २५, २६, २९, ३०। सासादने २९, ३०। असंयते २८, २९ दे ति। पर्याप्तेरुपरि षड्लेश्ये मिथ्यादृष्टौ त्रयोविंशतिकादीनि षट्, सासादनेऽष्टाविंशतिकादीनि त्रीणि २८, दे २९ ति म ३० ति उ। मिश्रे देवगत्यष्टाविंशतिकमेव। असंयते शुभलेश्यात्रयं देशसंयतादिद्वये च तदादिद्वयं २८ दे २९ दे ती। अप्रमत्ते ते चेमे च ३० दे आ २ ३१ दे आ २ ती। अपूर्वकरणे शुक्ललेश्ये तानि चेदं च। बादरानिवृत्तिकरणे सूक्ष्मसांपराये चैककमेव। नोपशांतादिषु नामबंधः। भोगभूमौ तत्तिर्यग्वक्तव्यं। देवगतौ भवनत्रये अपर्याप्ते त्र्यशुभलेश्याः। पर्याप्ते तेजोजघन्यांशः। पर्याप्तापर्याप्तवैमानिकेषु सौधर्मद्वयस्याद्येंद्रकश्रेणीबद्धप्रकीर्णकेषु तेजोजघन्यांशः। द्वितीयेंद्रकादासनत्कुमारद्वयस्य षष्ठेंद्रकं तेजोमध्यमांशः सप्तमेंद्रकश्रेणीबद्धेषु तदुत्कृष्टपद्मजघन्यांशौ ब्रह्मद्वयस्येंद्रकेषु चतुर्षु लांतवद्वयस्य द्वयोः शुक्रद्वयस्यैकस्मिंश्च पद्ममध्यमांशः शतारद्वयस्यैकस्मिंस्तदुत्कृष्टशुक्लजघन्यांशौ आनतचतुष्कस्य षट्सु नवग्रैवेयकानां नवस्वनुदिशानामेकस्मिन्ननुत्तरश्रेणीबद्धेषु च शुक्लमध्यमांशः सर्वार्थसिद्धावुत्कृष्टांशः। जन्मावासास्तु वैमानिकानां त्रिषष्टिपटलानि। भावनानां रत्नप्रभाखरभागे द्वासप्ततिलक्षाधिकसप्तकोटिभवनानि। व्यंतराणामसंख्यातद्वीपसमुद्राः। ज्योतिष्काणां सुदर्शनमेरुं तिर्यगेकविंशत्येकादशशतयोजनानि मुक्त्वा चित्रात उपरि नवत्यग्रसप्तशतयोजनानि गत्वा दशाग्रशतयोजनबाहुल्येन लोकांतं स्थितानि संख्यातरज्जुगुणितप्रतरांगुलभक्तजगत्प्रतरमात्रविमानानि। मिथ्यादृष्टीनामुत्पत्तिः कर्मभूमिमनुष्यसंज्ञिगर्भजतिरश्चोः कृष्णादिचतुर्लेश्ययोर्भवनत्रये गर्भजासंज्ञिनस्तेजोलेश्यस्य भावनव्यंतरयोरेव तद्देवायुरुत्कृष्टस्थितिबंधस्य पल्यासंख्येयभागमात्रत्वात्। तिर्यग्जघन्यभोगभूमित्रिविधमनुष्यभोगभूमिषण्णवतिकुभोगभूमिजानां तेजोलेश्यानां भवनत्रये, न च सम्यग्दृष्टीनां बद्धदेवायुस्तिर्यग्मनुष्यप्रथमोपशमसम्यग्दृष्टेरप्यनंतानुबंध्यन्यतमोदयेन तत्सम्यक्त्वं हत्वैव कृष्णादिचतुर्लेश्याभिस्तत्रोत्पत्तेः। तेन निर्वृत्त्यपर्याप्ता मिथ्यादृष्टयोऽष्टाविंशतिकं विना पंचविंशतिकादीनि चत्वारि बध्नंति २५ ए प २६ ए प आ उ २९ ति म ३० ति उ। सासादने द्वे २९ ति म ३० ति उ। सौधर्मद्वयमिथ्यादृष्टिषु नरतिर्यग्लोककर्मभूमितिर्यंचः चरकपरिव्राजादयः द्रव्यजिनलिंग्यादयश्च तेजोलेश्ययोत्पद्यंते। ते निर्वृत्त्यपर्याप्तकपंचविंशतिकषड्विंशतिकनवविंशतिकत्रिंशत्कानि २५ ए प २६ ए प आ उ २९ ति म ३० ति उ। तत्सासादनेषु देशसंयतांततिर्यंचः प्रथमोपशमसम्यक्त्वं प्रमत्तांतमनुष्या उभ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योपशमसम्यक्त्वे च विराध्य बद्धदेवायुषः तेजोलेश्ययोत्पद्यंते ते स्वयोग्यनवविंशतिकादिद्वयं २९ ति म ३० ति उ । तदसंयतेषु सर्वभोगभूमिवेदकक्षायिकसम्यग्दृष्टयः कर्मभूम्यसंयततिर्यंचः सतीर्थातीर्थासंयताद्यप्रमत्तांतमनुष्याश्च बद्धदेवायुष्कास्तेजोलेश्ययोत्पद्यंते ते सतीर्थाः मनुष्यगतितीर्थयुतत्रिंशत्कं, अतीर्थाः मनुष्यगतिनवविंशतिकं, भोगभूमिपद्मशुक्ललेश्यासंयता अपि सोहम्मदुजाइणो सम्मेति मरणे तेजोलेश्यां प्राप्य तत्रोत्पद्यंते । असंयतादिपद्मशुक्ललेश्या अपूर्वकरणादिशुक्ललेश्या अपि तामेव प्राप्य तत्रोत्पद्यंते

उत्तरसेढीबद्धा वायव्वीसाणकोणगइपयणा ।
उत्तरइंदणिबद्धा सेसा दक्खिणदिसिंदपडिबद्धा ॥ १ ॥

इति सौधर्मैशानविभागः । सानत्कुमारद्वये चक्रेंद्रकश्रेणीबद्धादिपर्यंतं तेजोलेश्यास्वपि न भोगभूमिजानां तत्रोत्पत्तिः, शेषाणां स्यात् । तन्निर्वृत्त्यपर्याप्ताः मिथ्यादृष्टिसासादनाः तिर्यग्मनुष्यगतियुते द्वे २९ ति म ३० ति उ । असंयताः मनुष्यगतियुतमनुष्यगतितीर्थयुते द्वे २९ म ३० म ति । उपर्यष्टकल्पेषु चरकादिकर्मभूमितिर्यग्मनुष्या बद्धदेवायुषः पद्मलेश्ययोत्पद्यंते । तन्मिथ्यादृष्टिसासादनाः तिर्यग्मनुष्यगतियुते द्वे २९ ति म ३० ति उ । असंयताः स्वयोग्ये द्वे २९ म ३० म ती । आनतादिचतुःकल्पनवग्रैवेयकशुक्ललेश्यामिथ्यादृष्टिसासादनाः मनुष्यगतिनवविंशतिकं । तदसंयताः नवानुदिशपंचानुत्तरशुक्ललेश्यासंयताश्च तच्च तीर्थमनुष्यगतित्रिंशत्कं च । अत्र प्रस्तुतगाथा—

णरतिरिय देसअयदा उक्कस्सेणच्चुदोत्ति णिग्गंथा । णय अयददेसमिच्छा गेवेज्जंतोत्ति गच्छंति ॥ ५४५ ॥
सव्वट्ठोत्ति सुदिट्ठी महव्वई भोगभूमिजा सम्मा । सोहम्मदुगं मिच्छा भवणतियं तावसा य वरं ॥
चरया य परिव्वाजा बह्मोत्तरच्चुदपदोत्ति आजीवा । अणुदिसअणुत्तरादो चुदा ण केसवपदं जंति ॥
सोहम्मो वरदेवी सलोगवाला य दक्खिणमरिंदा । लोयंतिय सव्वट्ठा तदो चुदा णिव्वुदिं जंति ॥
णरतिरियगदीहिंतो भवणतियादो य णिग्गया जीवा । ण लहंते ते पदविं तेसट्ठिसलागपुरिसाणं ॥
सुहसयणग्गे देवा जायंते दिणयरं व पुव्वणगे । अंतोमुहुत्तपुण्णा सुगंधिसुहफाससुचिदेहा ॥
आणंदतूरजयथुदिरवेण जम्मं विबुज्झ संपत्तं । दट्ठूण सपरिवारं गयजम्मं ओहिणा णच्चा ॥
धम्मं पसंसिदूणं ण्हादूणं दहेभिसेयलंकारं । लद्धा जिणाभिसेयं पुज्जं कुव्वंति सुद्दिट्ठी ॥ ८ ॥
सुरबोहियावि मिच्छा पच्छा जिणपूजणं पकुव्वंति । सुहसायरमज्झगया देवा ण विदंति गयकालं ॥
महपूजासु जिणाणं कल्लाणेसु य पजांति कप्पसुरा । अहमिंदा तत्थ ठिया णमंति मणिमौलिघडिदकरा ॥
विविहतवरयणभूसा णाणसुचीसीलवत्थसोम्मंगा । जे तेसिमेव वस्सा सुरलच्छी सिद्धिलच्छी य ॥

अत्र—

अयदोत्ति छल्लेस्साओ सुहतियलेस्सा हु देसविरदतिये ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्तो सुक्का लेस्सा अजोगठाणं अलेस्सं तु ॥ १ ॥

इत्यशुभलेश्यात्रये बंधस्थानानि त्रयोविंशतिकादीनि षट्, तेजोलेश्यायां पंचविंशतिकादीनि षट्, पद्मलेश्यायामष्टाविंशतिकादीनि चत्वारि, शुक्ललेश्यायां तदादीनि पंच, सूक्ष्मसांपरायांतं यथासंभवं ॥ ५४९ ॥

स० चं०—कृष्णादिक अशुभ तीन लेश्याविषैं कार्माणयोगवत् आदिके छह बंध स्थान हैं। बहुरि तेजो लेश्याविषैं पचीसकानै आदि देकरि छह हैं बहुरि पद्मलेश्याविषैं अठाईसकानै आदि देकरि च्यारि हैं। बहुरि शुक्ललेश्याविषैं अवधिज्ञानवत् अंतके पंच स्थान हैं। तहां वर्णनामा नामकर्मके उदयतैं भया शरीरका वर्ण द्रव्यलेश्या सा इहां ग्रहण न करी। मोहका उदय वा उपशम वा क्षय वा क्षयोपशमतैं भई जीवकी चंचलता रूप भाव लेश्या सो इहां ग्रहण करी है सो लेश्या कृष्णादिक भेदतैं छहप्रकार है। तहां प्रथम नरकका प्रथम इंद्रकविषैं कपोतका जघन्य अंश है। तीसरा नरकका द्विचरम इंद्रकविषैं कपोतका उत्कृष्ट अंश है। बहुरि तीसरा नरकका अंत इंद्रकविषैं नीलका जघन्य अंश है। पंचम नरकका द्विचरम इंद्रकविषैं नीलका उत्कृष्ट अंश है। बहुरि पंचम नरकका अंत इंद्रकविषैं कृष्णका जघन्य अंश है। बहुरि सप्तम नरकका अवधिस्थान इंद्रकविषैं कृष्णका उत्कृष्ट अंश है। तिन जघन्य उत्कृष्ट स्थानकनिका मध्यविषैं तिन तिन लेश्यानिका मध्यम अंश जानने। तिन नरकनिविषैं उपजनेकौं योग्य कौन जीव हैं? सो कहिए है—

मिथ्यादृष्टी जीव घर्मा पृथ्वीविषैं कर्मभूमिया छहौ संहननके धारी असंज्ञी सरीसृप पंखी सर्प सिंह स्त्री मछला मनुष्य उपजै हैं। तहां वंशाविषैं सरीसृपादिक ही उपजैं हैं असंज्ञी नाहीं उपजैं हैं। मेघाविषैं पंखी आदिक ही उपजैं हैं। अंजनाविषैं आदिके पंच संहननके धारक सर्पादिक ही उपजैं हैं। अरिष्टाविषैं सिंघादिक ही उपजैं हैं। मघवीविषैं आदिके च्यारि संहननके धारक स्त्री मछले मनुष्य ही उपजैं हैं। माघवीविषैं आदि संहननके धारक मछले वा मनुष्य ही उपजै हैं ते तिन नरकनिविषैं उपजे शरीर पर्याप्ति पूर्ण भएं वा न पूर्ण भएं तिर्यंचका मनुष्यगति युत गुणतीस वा तीसके स्थाननिकौं बांधै हैं। सातवी पृथ्वीविषैं तिर्यंचगतियुक्त ही गुणतीस तीसके स्थानानिकौं बाधै हैं। बहुरि सासादनवाले भी तैसैं ही तिर्यंच मनुष्यगतियुत दोऊ स्थानानिकौं बाधै हैं। बहुरि मिश्र अर असंयतवाले

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनुष्यगतियुत गुणतीसहीकौं बांधै हैं। बहुरि घर्माविषैं निर्वृत्त्यपर्याप्त वा पर्याप्त क्षायिक वा वेदक सम्यग्दृष्टी वा कृतकृत्य वेदक तीर्थसत्त्व रहित सो तौ मनुष्यगति गुणतीसकेकौं अर तीर्थसत्त्व सहित सो मनुष्यगति तीर्थसहित तीसकेकौं बांधै हैं। बहुरि वंशा मेघाविषैं तीर्थंकरसत्त्व सहित जीव सो पर्याप्ति पूर्ण भएं नियमकरि मिथ्यात्वकौं छोडि सम्यग्दृष्टी होइ तीसकेकौं ही बांधै हैं। बहुरि तिर्यंचगतिविषैं पर्याप्तादिक तीनप्रकार सर्व एकेंद्री वेंद्री तेंद्री चौंद्रीनिविषैं वा लब्धि अपर्याप्त निर्वृत्त्यपर्याप्त असंज्ञीविषैं वा मिथ्यादृष्टी नरकादिकस्यों आया तीहिंविषैं वा सासादन अपर्याप्त संज्ञीविषैं तीन अशुभलेश्या ही हैं। बहुरि पर्याप्त मिथ्यादृष्टी असंज्ञीविषैं कृष्णादिक च्यारि लेश्या हैं। बहुरि पर्याप्त सासादन अर मिश्र अपर्याप्त असंयत संज्ञी तिर्यंच तिसविषैं छह लेश्या हैं। बहुरि भोगभूमिविषैं निर्वृत्त्यपर्याप्तक असंयतविषैं जघन्य कपोत ही है। अर पर्याप्त अवस्थाविषैं मिथ्यादृष्टी वा सम्यग्दृष्टीकैं तीन शुभ लेश्या ही हैं जातैं तहांके उपजे जीवनिकैं शरीर पर्याप्ति पूर्ण होतैं तीन शुभ लेश्या ही आगमविषैं कहीं हैं। बहुरि ए कहे तिर्यंच जीव तिनविषैं वादर सूक्ष्म पृथ्वी अप तेज वायु नित्यनिगोद चतुर्गति निगोद अर प्रतिष्ठित अप्रतिष्ठित प्रत्येक अर वेंद्री तेंद्री चौंद्री अर संज्ञी असंज्ञी पंचेंद्री ए उगणीस प्रकार तिर्यंच लब्धि अपर्याप्तक अर इन उगणीस प्रकार लब्धि अपर्याप्तकनितैं वा तिर्यंच पर्याप्तकनितैं अर पर्याप्त वा अपर्याप्त कर्मभूमिया मनुष्यनितैं इन सर्व मिथ्यादृष्टीनितैं आयकरि जे केई तीन अशुभलेश्या सहित तिर्यंच जीव उपजैं ते अठाईसका विना तेईसकानैं आदिदेकरि पांचस्थाननिकौं बांधै हैं। बहुरि तेजकाय वातकायके जीव तिर्यंचगतियुत ही तिन पंचस्थाननिकौं बांधै हैं। बहुरि ते उगणीस प्रकार लब्धि अपर्याप्त तिर्यंच उगणीस प्रकार पर्याप्त तिर्यंच दोय प्रकार मनुष्य मिलि भए चालीस प्रकार मिथ्यादृष्टि ते अशुभ तीन लेश्याकरि मरे हुए पूर्वोक्त उगणीस प्रकार पर्याप्त तिर्यंच मिथ्यादृष्टीनिविषैं उपजैं हैं। तहां विशेष—

जो तेजःकाय वातकायविषैं तौ अशुभलेश्यानिका मध्यम अंश तिनहीकरि उपजै हैं अर भवनत्रिक सौधर्मद्विकके देव मिथ्यादृष्टी तेजोलेश्याका मध्यम अंशकरि अर तिर्यंच मनुष्य अशुभ तीन लेश्याका मध्यम अंशकरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मरे हुए केई बादरपृथ्वी अप्रतितिष्ठत प्रत्येकनिविषैं उपजै हैं । बहुरि भवनत्रिकादिक सहस्रारपर्यंत देव सर्वं नारकी मिथ्यादृष्टी तिर्यंचायुका जिनकैं बंध भया ते अपनी अपनी लेश्यानिकरि मर हूए कर्मभूमिया गर्भज संज्ञी तिर्यंचनिविषैं उपजै हैं । तहां ते पूर्वोक्त उगणीस प्रकारके तिर्यंच चतुर्गतितैं आयकरि उपजे निर्वृत्यपर्याप्त मिथ्यादृष्टी सर्व ही अठाईसका विना तेवीसकानैं आदि देकरि पांच स्थाननिकौं बाधे हैं । बहुरि अनंतानुबंधीविषैं किसी एक प्रकृतिका उदयतैं प्रथमोपशम सम्यक्त्वकौं विराधिकरि सासादन होइ पूर्वैं बाधी है तिर्यंचायु जिनि ऐसैं जीव मरिकै वा जिनकैं आयुबंध न भया ते केई तिसही अंतकालविषैं तिर्यंचायुकौं बाधि मरिकैं तिर्यंचविषैं उपजैं जहां कर्मभूमियां तिर्यंच मनुष्य तो बादर पृथ्वी अप् प्रत्येक वनस्पती विकलत्रय संज्ञी असंज्ञीविषैं उपजैं। ईशानपर्यंत देव अपनी अपनी लेश्या सहित मरि बादर पृथ्वी अप प्रत्येक वनस्पतीविषैं उपजै । भवनत्रिकादि सहस्रार पर्यंत अर छठा नरकपर्यंत नारकी कर्मभूमिया गर्भज संज्ञी तिर्यंचनिविषैं उपजै। ते ए सासादन तिर्यंच होंइ तिर्यंच मनुष्यगति पर्याप्तयुत गुणतीस वा तीसकाकौं बाधे हैं। बहुरि अपना अपना सासादनका काल भएं पीछैं नियमकरि मिथ्यादृष्टि होइ यावत् शरीर पर्याप्ति पूर्ण न होइ तावत् निर्वृत्ति अपर्याप्तक तिर्यंच मिथ्यादृष्टिविषैं कहे तेईसकानैं आदि देकरि पांच स्थान तिनकौं बाधैं हैं इहां प्रश्न--

जो सासादनका तौ उत्कृष्टकाल भी छह आवली प्रमाण अर आयुका जघन्यकाल भी अंतर्मुहूर्तप्रमाण सो पूर्व उत्तर दोऊ पर्यायनिविषैं सासादन कैसैं संभवै ? ताका समाधान--

